Digitized by eGangotri and Sarayu Trust.

6339

Price -/12/-

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 976.

PRATAP SINGH ... SRINAGAR

6006



# प्राकृतपैङ्गलम् ।

# 'PRĀKRIṬA-PAINGALAM'

EDITED BY

CHANDRA MOHANA GHOSHA, M.B., B.A.

AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM
OF SANSKRIT PROSODY.

FASCICULUS III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1900.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

6339
Price -/12/-

# BIBLIOTHECA INDICA:

A

## COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 976.

PRATAP SINGH ... SRINAGAR
6006



# प्राकृतपैङ्गलम् ।

# 'PRĀKRITA-PAINGALAM'

EDITED BY

CHANDRA MOHANA GHOSHA, M.B., B.A.
AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM
OF SANSKRIT PROSODY.

FASCICULUS III.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1900.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

# LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

# ASIATIC SOCIETY OF BENGAL,

**No. 57, PARK STREET, CALCUTTA,**

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

## BIBLIOTHECA INDICA.

### *Sanskrit Series.*

| | Rs. | |
|---|---|---|
| Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ... | 1 | 8 |
| *Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each ... ... .. | 4 | 2 |
| Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/ ... ... ... | 7 | 8 |
| Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each ... ... ... | 1 | 14 |
| Aphorisms of Sāṇḍilya, (English) Fasc. 1 ... ... ... | 0 | 12 |
| Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ... | 2 | 4 |
| Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each ... ... ... | 1 | 14 |
| Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each ... ... ... ... ... | 10 | 0 |
| *Bhāmatī, (Text) Fasc. 4–8 @ /6/ each ... ... ... | 1 | 14 |
| Bhāṭṭa Dīpikā Vol. I, Fasc. 1–2 ... ... ... ... | 0 | 12 |
| Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each ... ... ... | 1 | 8 |
| Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each ... ... ... | 2 | 4 |
| Catalogue of Sanskrit Books and MSS., Fasc. 1–2 @ 2/ each ... | 4 | 0 |
| Çatapatha Brāhmaṇa, Fasc. 1–2 ... ... ... ... | 0 | 12 |
| *Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each ... ... ... ... | 19 | 14 |
| Çlokavartika, (English) Fasc. 1 ... ... ... ... | 0 | 12 |
| *Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–14 @ /6/ each ... ... | 4 | 2 |
| Ditto Lāṭyāyana, (Text) Fasc. 1–9 @ /6/ each ... | 3 | 6 |
| Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each ... ... | 5 | 10 |
| Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each ... ... ... | 1 | 2 |
| Gadadhara Paddhati Kālasāra Vol I. Fasc. 1 ... ... ... | 0 | 6 |
| Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each ... ... ... | 1 | [illegible] |
| Kāla Viveka, Fasc 1–4 ... ... ... ... | 1 | 8 |
| Kātantra, (Text) Fasc. 1–6 @ /12/ each ... ... ... | 4 | 8 |
| Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each ... ... | 10 | 8 |
| Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each ... ... ... | 3 | 6 |
| Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each ... ... | 2 | 4 |
| Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each... ... ... | 4 | 2 |
| Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–7 @ /6/ each ... ... | 2 | 10 |
| Manuṭīkā Saṅgraha, (Text) Fasc. 1–4 @ /6/ each ... ... | 1 | 8 |
| Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each ... ... | 4 | 8 |
| *Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each ... ... | 4 | 14 |
| Nārada Smṛti, (Text) Fasc. 1–3 @ /6/ ... ... ... | 1 | 2 |
| Nyāyavārtika, (Text) Fasc. 1–4 @ /6/ ... ... ... | 1 | 8 |
| *Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ... | 5 | 4 |

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



PRATAP SINGH MUSEUM, 6006

ता[1] सक्को[2] संभो सूरो गंडो खंधो बिजओ दप्पो
तालंको समरो[3] सीहो[4] सीसो[5] उत्तेओ[6] पड़ि[7] बक्खो।
परिधम्म मआलु[8] मइंदो दंडो[9] मक्कलु[10] मओणु[11] मरट्ठो[12]
बासंठो[13] कंठो[14] मोरो[15] बंधो[16] भमरो भिस मरट्ठो[17] ॥
[११३। चउपइआ]

---

वर्द्धते—लघुद्वयस्थाने भवति, शक्रगणमारभ्य भृङ्गगणपर्य्यन्तं पंचचत्वारिंशत् भेदान् जानीहि, एकैकगुरुवृद्धिक्रमेण चतुश्चत्वारिंशद्गुरुर्भृङ्गनामा, शक्रः सर्व्वलघुरिति मिलित्वा पंचचत्वारिंशन्नामान्याह। (C).

११२। अथ स्पष्टतया संख्यानियतकाव्यभेदानयनप्रकारमाह जहेति। यथा यथा वलआ बड्ढि हइ—वलयं गुरुर्वर्द्धते, तह तह—तथा तथा णाम कुणेहु—[ना]म कुरुष्व, संभुहि सउ—शंभुना साद्धं भिंगगण—भृंगगणं भणि—भणित्वा, शंभुमारभ्य भृंगगणपर्यंतमित्यर्थः, चौ[चउ]आलीस—चतुश्चत्वारिंशत्, भेदानिति शेषः, मुणेहु—जानीहि। अयं भावः—षण्णवतिलघ्वात्मक एको

---

११२। १ Non est (F). २ Non est (E & F). ३ सरसो (C). ४ सिंहो (D & F). ५ सेसो (D). ६ उत्तेउ (B & C). ७ बलि (A), परि (B & D), पलि (C). ८ मरालु (B & C), मराल (D & E). ९ मञ्जो दण्डो (C). १० मक्करु (A). ११ मआणु (A), मआङ्ग (B), मआन्ध (C). १२ मरट्ठ (D), महरट्ठो (E), मरहट्ठ (F). १३ वामण्डो (B & C), वासंतो (D & E), वासंत (F). १४ कन्दो (C). १५ मेरो (B & C). १६ वन्दो (C). १७ मरहट्ठ (D & F), महारट्ठ (E).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



गुरुर्वर्द्धते, एवं यः शक्रः उक्तः तत्र च यदि लघुद्वयमूनीकृत्य तन्मात्राक एको गुरुर्वर्द्धते एवमेकोगुरुश्चतुर्णवतिर्लघवश्च यत्र पतंति, संभुउ[शंभु]नामा द्वितीयो भेदः। एवमग्रेऽपि बोध्यम्। ते लिखित्वा प्रदर्श्यंते, तथा। (E).

११२। यथेति [जद्देति]॥ यथा यथा वलयो वर्धते तथा तथा नाम कुरुत॥ शंभुमारभ्य भृंगावधिं गणय॥ चतु[श्चत्वा]-रिंशज्जानीहि॥ ११॥ (G).

[Including S'akra there are 45 varieties, besides S'akra 44.—Ed.]

११३। तत् शक्रः शम्भुः सूरः गण्डः स्कन्दः विजयः दर्पः तालङ्कः सरभः सिंहः शीर्षः उत्तेजाः प्रतिपत्तः परिधर्म्मा मरालः मृगेन्द्रः दण्डः मर्कटः [अनुः] आन्धः[मदान्धः] मरट्टः वामस्थः कण्ठः मयूरः बन्धः भ्रमरः भिन्दः महाराष्ट्रः। (C).

११३। गु १ ल ९४ शम्भुः, गु २ ल ९२ सूर्य्यः, गु ३ ल ९० गंडः, गु ४ ल ८८ स्कंधः, गु ५ ल ८६ विजयः, गु ६ ल ८४ दर्पः, गु ७ ल ८२ तालांकः, गु ८ ल ८० समरः, गु ९ ल ७८ सिंहः, गु १० ल ७६ शीर्षं, गु ११ ल ७४ उत्तेजाः, गु १२ ल ७२ प्रति-पत्तः, गु १३ ल ७० परिधर्मः, गु १४ ल ६८ मरालः, गु १५ ल ६६ मृगेंद्रः, गु १६ ल ६४ दंडः, गु १७ ल ६२ मर्कटः, गु १८ ल ६० कालः [?], गु १९ ल ५८ महाराष्ट्रः, गु २० ल ५६ वसंतः, गु २१ ल ५४ कंठं, गु २२ ल ५२ मयूरः, गु २३ ल ५० बंधः, गु २४ ल ४८ भ्रमरः, गु २५ ल ४६ भिन्न[न्न]महाराष्ट्रः। (E).

११३। नामान्याह॥ संभो इति॥ शंभु १, सूर्य २, गंड ३,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



बलहद्दो[1] राअो[2] बलिअो[3] मोहो[4] मंथाणो[5] बलि मेहो[6]
सहसक्खो[7] बालो दरिअो सरहो[8] दंभो[9]ऽहो[10] उद्दंभो[11] ।
बलिअंको तुरअो हरिणो[12] अंधो मुद्धीए[13] तह भिंगो
वत्थुआ[14] णामो[15] पिंगलणाअो[16] जंपइ[17] छंदपबंधो[18] ॥
११४[19] ॥ [चउपइआ] ।

---

स्कंध ४, विजय ५, दर्प ६, तालंक ७, समर ८, सिंह ९, शेष १०, उत्ते[जा] ११, प्रतिपक्ष १२, परिधर्म्म १३, मराल १४, मृगेंद्र १५, दंड १६, मर्कट १७, मदन १८, महाराष्ट्र १९, वसंत २०, कंठ २१, मयूर २२, बंध २३, भ्रमर २४, भिन्नमहाराष्ट्र २५। (G).

११४। बलभद्रः रजोवलो मोहः मन्थानः परिमोहः सहस्राक्षः बालः दृप्तः समरो हस्तो भवत्युदकुम्भः। बालीरङ्गं तुरगः हरिणः अंधः मुग्धे तथा भृङ्गः, अमूः संज्ञा वस्तुनाम पिङ्गलनागो जल्पति छन्दःप्रबन्धम्। (११२ श्लोकपादे) मरट्टशब्दो गर्भवाचकः, अनुशब्दः कामुकवाची, वामण्ड इत्यत्र वामन्न इति पाठे वामनः, वस्त्विति काव्यच्छन्दसो नामान्तरम्। (C).

---

११४। १ बलहद्दौं (E), बलभद्द (F). २ चाअो (A), राआ (E). ३ Non est (A). ४ मेह (B), रामो (D & F), मोक्खो (E). ५ मन्थाणो (B & C). ६ बलिमोहो (A, B, D & F). ७ सहसक्को (B & C). ८ मरहो (E), सनरो (C). ९ दम्भो (B & C). १० ओ (A). ११ उकुम्भो (B & C). १२ ररिणो (A). १३ मुद्धीओ (B & C), मुद्धिए (E), मुद्धो (F). १४ वच्छु-आ (A), वाबुआ (B), चउआरीसए वत्थुअ (F). १५ नामं (A), नीमो (D). १६ राओ (A). १७ जप्पइ (B & C). १८ परासो (C), छंदबंधो (E). १९ १४ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



११४ । गु २६ ल ४४ बलभद्रः, गु २७ ल ४२ राजा, गु २८ ल ४० बलितः, गु २९ ल ३८ मोक्षः, गु ३० ल ३६ मंथानः, गु ३१ ल ३४ बलिः, गु ३२ ल ३२ मेघः, गु ३३ ल ३० सहस्राक्षः, गु ३४ ल २८ बालः, गु ३५ ल २६ दरिद्रः, गु ३६ ल २४ सरभः, गु ३७ ल २२ दंभः, गु ३८ ल २० उद्दंभः, गु ३९ ल १८ अहः, गु ४० ल १६ पलितांकः, गु ४१ ल १४ तुरंगः, गु ४२ ल १२ हरिणः, गु ४३ ल १० अंधः, गु ४४ ल ८ भृंगः। एवं पूर्वभेदापेक्षया लघुद्वयन्यूनक्रियया तत्समानमात्राकैकगुरुवर्द्धनेन च शक्रमारभ्य भृंगपर्यन्तं पंचचत्वारिंशद्भेदा बोध्याः ॥

अथ शक्रात् क्रममारभ्य चत्वारो भेदास्तृतीये विप्रदानपक्ष एव संभवन्ति। पंचममारभ्य एकचत्वारिंशत्पर्यन्तं च तृतीये जगणदानपक्षेऽपि विप्रपक्षेऽपि संभवंति। द्विचत्वारिंशत्तममारभ्य पंचचत्वारिंशत्पर्यन्तं च चत्वारो भेदास्तृतीये जगणमवलम्ब्यैव संभवन्ति। विप्रपक्षे पदचतुष्टये मिलित्वा षोडशलघूनां जगणपक्षे चाष्टगुरूणा-[लघूना]मावश्यकत्वादिति बोध्यम् ॥

अथ प्राकृतसूत्रेण शम्भ्वादिभृंगांतानां पूर्वोक्तचतुश्चत्वारिंशद्भेदानां नामान्याह, ता संभो इति। शम्भुः १, सूर्यः २, गंडः ३, स्कंधः ४, विजयः ५, दर्पः ६, तालांकः ७, समरः ८, सिंहः ९, शीर्षं १०, उत्तेजाः ११, प्रतिपक्षः १२, परिधर्मः १३, मरालः १४, मृगेंद्रः १५, दंडः १६, मर्कटः १७, [?] कालः १८, महाराष्ट्रः १९, वसंतः २०, कंठं २१, मयूरः २२, बंधः २३, भ्रमरः २४, भिन्नमहाराष्ट्रः २५, बलभद्रः २६, राजा २७, बलितः २८, मोक्षः २९, मंथानः ३०,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पचतालीसह[1] बत्थुआ[2] छंदे[3] छंद बिअंभ[4]।
अक्खा कइ पिंगल[5] कहइ चलइ[6] ण हरिहर बंभ[7]॥
११५[8]॥ दोहा।

---

बलिः ३१, मेघः ३२, सहस्राक्षः ३३, बालः ३४, दरिद्रः ३५, सरभः ३६, दंभः ३७, उद्दंभः ३८, अहः ३९, पलितांकः ४०, तुरंगः ४१, हरिणः ४२, अंधः ४३, तह—तथा, भृंगः ४४। हे मुद्धि—मुग्धे, ता—एतानि चतुश्चत्वारिंशदिति शेषः, बत्थुआ णाम—वस्तुकनामान्येतानि वास्तु—ता संभो सूरो गंडो खंधो विजओ दप्पो तालंको समरो सीहो सेसो उत्तेओ पडिब * * * वोकापरनामकाव्यच्छंदसः नामानीति यावत्, छंदपबंधो—छंदःप्रबन्धः छंदसा प्रकृष्टो बंधो यस्मात् स तादृश इत्यर्थः, पिंगलणाओ—पिंगलनागः जंपइ—जल्पति॥ (E).

११४। बलभद्र २६, राजा २७, बलित २८, राम २९, मंथान ३०, बली ३१, मोह ३२, सहस्राक्ष ३३, बाल ३४, दरिद्र ३५, शरभ ३६, दंभ ३७, अहः ३८, उद्दंभ ३९, बलितांक ४०, तुरग ४१, हरिण ४२, अंधमुग्ध ४३, तथा भृंग ४४—चतुश्चत्वारिंशत्॥ इति वस्तुनो नामानि पिंगलो नागो जल्पति छंदःप्रबंधे॥ वस्तु काव्य-नामकच्छंदः॥ १४॥ (G).

---

११५। १ पांचतालीसह (B & C), पचतालीसह (E). २ बच्छु (A). ३ छंद (F). ४ विश्वमह (B & C), बिभंत (F). ५ पिंगलु (F). ६ वलइ (D). ७ वम्भु (B), वमह (C). ८ ११ (A), १५ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पअह[१] असुद्धउ पंगु हीण खोडउ पभणिज्जइ
मत्तग्गल बाउलउ[२] सुस्सकल[३] कस्स सुणिज्जइ[४] ।
झल[५]बज्जिअ[६] तह बहिर[७] अंध अलंकार रहिअउ[८]
बुलउ[९] छंद[१०] उट्टवण[११] अत्थ[१२] विणु[१३] दुब्बल कहिअउ ॥
डेरउ हट्ट[१४]क्खरहिं[१५] होइ काणा गुण सब्बहि रहिअ[१६] ।
सब्बंगसुद्ध समरुअ[१७]गुण छप्पअ[१८] दोस पिंगल कहिअ[१९] ॥
११६[२०] ॥ [छप्पअ]

---

११५। पञ्चचत्वारिंशद्वस्तु छन्दसा विजृम्भते। तत्त्वतः कवि-पिङ्गलः कथयति न चलति हरिहरब्रह्मा ॥ वस्तुनामकच्छन्दः छन्दसा प्रकारभेदेन पञ्चचत्वारिंशद्विधं विजृम्भते, न चलति—अन्यथा न भवति, हरिहरादिनाऽन्यथा कर्त्तुं न शक्यते इत्यर्थः, अथच ग्रन्थकर्त्ता हरिहरवन्दी न चलति न भ्रान्तो भवतीत्यर्थः ॥ (C).

११५। अथ शक्रमादाय संख्यान्तरं दोहावृत्तेनाह पंचतालीसह

---

११६। १ पअहं (D). २ वाउंलञ्ज (B), वाउंल (D), बाउल (E & F). ३ सुसफल (D & F). ४ कहिज्जइ (A), खुणिज्जइ (B & C), सुणिज्जसु (F). ५ फल (A). ६ वज्झिअ (B). ७ गुणरहिअ (A), गुणवहिर (B & C). ८ लंकारविरहिअउ (A), लंकारहं रयिअउ (D), लंकारहि रहिअउ (E). ९ बोलउ (A, B & C), बूलउ (E & F). १० छंदु (A). ११ उट्टिअवणु (F). १२ अच्छ (A). १३ विष (B & C). १४ अवहट्ट (A), अहट्ट (B & C). १५ रहि (E & F). १६ काणउ तह राअ रंक सव्वहि गहिअ (A), काणउ अगुण राअ अङ्क सवहिँ गहिउ (B & C). १७ रूअ (A & F), अङ्कसरिसगुण (B), रसहअगुण (C). १८ कव्वह (E). १९ पिङ्गले कहिउ (B & C), पिंगलु कहिअ (D). २० १२ (A), ११ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



इति। बत्थुआ छंदे—वास्तुकच्छंदसि वास्तुकापरनाम्नि काव्यच्छंदसीति यावत्, पंचतालीसह—पंचचत्वारिंशत् छंद—छंदांसि भेदा इति यावत्, विअंभ—विजृंभते इति अक्खाकद—साचात्कृत्य, पिंगल कहइ—पिंगलः कथयति, अच हरिहरब्रह्मणोऽपि न चलंति, तेऽप्येनमन्यथा न कुर्वंतीति भावः ॥ (E).

११५। पंचेति ॥ पंचचत्वारिंशद्वस्तुनश्छंदसो भेदा विजृंभन्ते ॥ शक्रनामकसर्वलघुभेदेन सहेत्यर्थः ॥ अक्खेति ॥ अक्खा कविः पिंगलः कथयति, चलंति न हरिहरब्रह्माणः ॥ चलंति अन्यथा कर्त्तुमसमर्था इत्यर्थः ॥ १५ ॥ (G).

११६। अथ षट्पद[स्य] ये दोषाः काव्यच्छन्दसोऽपि ते दोषा इत्यतः षट्पददोषानाह। पदमशुद्धं पङ्गुः, हीनः खोडः, मात्राधिको वातूलः, शून्यकलः काणो जायते। झल्वर्जितो गुणरहितः, अन्धोऽलङ्काल[र]रहितः, वोडश्छन्दउत्थापनं, अर्थेन विना दुर्ब्बलः कथितः, टेरो हटः, काणोऽगुणः, राजाङ्गैः सर्व्वैर्गृहीतः सर्व्वाङ्गशुद्धो रसरूपगुणः षट्पददोषः पिङ्गलेन कथितः॥ पदमशुद्धञ्चेत्तदा पङ्गुः, पदस्याशुद्धता जगणादिनियमराहित्यं। हीनो गणहीनः। मात्राधिकः पञ्चविंशत्यादिमात्रायुक्तः, शून्यकलः त्रयोविंशत्यादिमात्रः। झल्वर्ज्जितः झल्प्रत्याहाररहितः, तेन झल्प्रत्याहारे ये वर्णा झभघढधादयस्तद्राहित्यं न कार्य्यमन्तरा अन्तरा तादृशवर्णा देया इति भावः। उपमादयोऽलङ्काराः। षट्कलादिस्थाने पञ्चकलादियोगे छंदस उत्थापनं, तेन वोडोभदन्तः। अर्थाभावे दुर्ब्बलः। हठः प्रतिपदमैत्रीरहितः, स टेरः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



केकराक्षो भवति। प्रसादादिगुणरहितः काणो बधिरः। सर्व्वै-रङ्गैर्यथोक्तविन्यासविशिष्टः सकलमात्राभियुक्तश्चेद् राजा भवति। शृङ्गारवीरादिरसानुरूपगुणयुक्तः सर्व्वाङ्गशुद्धः। अत्रालंकारादि-राहित्यं काव्यदोषो न छन्दोदोष इति ध्येयम्। (C).

११६। अथ काव्ये वर्जनीयदोषानाह पअह इति। पअह असुद्धउ—पादैः अशुद्धः न्यून इत्यर्थः पंगुः इत्युच्यते, पादचतुष्टय-मध्ये एकेनापि चरणेन हीनश्चेत्तदा पंगुरित्यर्थः। यत्तु पदे अशुद्धः प्राकृतव्याकरणदुष्ट इत्यर्थ इति तन्न, तथा सति संस्कृतरचित-काव्यस्य दुष्टत्वात्। हीनः पूर्व्वोक्तेन केनापि गणेन हीनश्चेदित्यर्थः तदा सः खोडउ—खंजः पभणिज्जइ—प्रभण्यते। यत्तु मात्रया हीन-इत्यर्थ इति तन्न, शून्यकलेत्यनेन पौनरुक्त्यापत्तेः। मत्तग्गल—मात्रयाधिकः लक्षणोक्तमात्रापेक्षया · एकया एकयापि मात्रया अधिक इत्यर्थः, बाउल—व्याकुलः। सुण्णकल—शून्यकलः एकयापि मात्रया न्यून इत्यर्थः कण्ण सुणिज्जइ—काणः श्रूयते। तथा झलवज्जिअ—झकारलकाराभ्यां वर्जित इत्यर्थः बहिर—बधिरः। अलंकारैः रहितः अंधः। छंदउट्टवण विणु—छंदसः यत् उट्टवनम् उट्टवनिका तां विनेत्यर्थः, उट्टवनिकायां क्रियमाणायां यदि आद्यंतषट्कलस्थाने सप्तकलः पंचकलो वा पतति, एवं मध्यस्थचतुष्क-लेषु यदि कश्चित्पंचकलस्त्रिकलो वा भवति, तृतीये च जगण-विप्राभ्यामन्य एव गणः पततीत्यर्थः बूलउ—मूकः कथितः। अत्थ विणु—अर्थेन विना, दुब्बल कहिअउ—दुर्ब्बलः कथितः। हट्ठ-क्खरहि—हठाक्षरैर्हठाकृष्टैरक्षरैः परस्परमैत्रीरहितैरित्यर्थः [डेरउ]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



—डेर: केकर: होइ—भवति । गुण सब्बहि—सर्व्वगुणैः प्रसाद-प्रभृतिभिः रहितः काणा—काणः भवति । एते कब्बह दोस—काव्यस्य दोषाः, सब्बंगसुद्ध समरुअगुण—सर्वांगशुद्धसमरूपगुणः सर्वांगे शुद्धः, समौ रूपगुणौ यस्य सः समरूपगुणः, सर्वांगशुद्ध-श्चासौ समरूपगुणश्च तादृशेन पिंगलेन कथिताः । अत्र हिअ इत्यक्षरद्वयमेकं बोध्यं "बणो बि तुरिअ पढिआँ" इत्युक्तेः [Vide श्लोकः ८, p. 11. —Ed.] अन्यथा मात्राधिक्यापत्तिः । (E).

११६ । पादे अशुद्धः पंगुः हीनः खंजः प्रभण्यते । हीनो मात्रादिन्यूनः, मात्राधिको वातुलः, शून्यकलः कर्णः [?] श्रूयते ॥ झकारलकाराभ्यां वर्जितस्तदा बधिरोऽंधोऽलंकाररहितः, मूकस्तु-टितवर्णोऽर्थेन विना दुर्बलः कथितः, केकरो हठाक्षरैर्भवति, काणः सर्व्वगुणैरहितः । हठेति—हठाक्षिप्ताक्षरमित्यर्थः । सर्वांगशुद्धेन समरूपगुणेन षट्पददोषाः पिंगलेन कथिताः ॥ १६ ॥ (G).

[Hereafter the following śloka is seen in MS. (A) only.—Ed.]

कइ पीडइ पंगुलउ लच्छिअ पहरिअइ खोडउ
कुलहाणिअ बाउलउ कम्म होइ पउर सक्कोलउ ।
सुद्धि हरइ बिमलंगु दुमण होइ अद्ध पआसइ
दुब्बल उब्बण बहइ देउलउ कित्ति बिणासइ ॥
काण कुब्ब बऊदुक्खकरु
पिंगल जंपइ कबि अणऊ ।
तलउ जाणि कप्पअ करऊ
सेस रहिज्जऊ गुणिजणऊ ॥ १४ ॥



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



बिप्प होअ[1] बत्तीस खत्ति बेआल[2] करिज्जसु[3]
अठतालिस[4] लहु बेस[5] सेस सुद्दउ सलहिज्जसु ।
चउअग्गल[6] पअ बीस[7] मत्त[8] छाणबइ[9] ठबिज्जसु
पंचताली[लि]सह[10] णाम कब्बलक्खणह करिज्जसु[11] ॥
छहबिस[12] उल्लालहि[13] एक्ककइ[14]
बिण्णि पाअ छप्पअ मुणहु[15] ।
समबस्स[16] सरिससमदोसगुण[17]
णाम एहत्तरि[18] परिगुणहु[19] ॥ ११७[20] ॥ षट्पदम् ।

११७ । जातिदोष[भेद]माह । विप्रलोको द्वाविं[त्रिं]शता—क्षत्रियो द्विचत्वारिंशता—[अष्टचत्वारिंशता] लघुभिर्वैश्यः, शेषैः शूद्रः श्लाघ्यताम् । चतुरधिकचत्वारिंशद्गुरुभिर्मात्राः षण्णवतिः स्थाप्यते । पञ्चचत्वारिंशन्नाम काव्यलक्षणं क्रियताम् । षड्विंशतिरुल्लाले एकीकृत्य द्वौ पादौ षट्पदं जानीहि । समवर्णं सदृशगुणं नामान्येकसप्ततिं जानीहि ॥ द्वाविं[त्रिं]शतेत्यादौ लघुभिरित्यनुषज्यते । शेषैस्ततो-

११७ । १ लोअ (A, B & C), होइ (E). २ वेआलीस (F). ३ भणिज्जसु (A). ४ अठताली (B), आटताली (C). ५ विस (B & C). ६ चउग्गल (B & C). ७ चालीस (B), चालीसगुरुहि (C). ८ मत्ता (F). ९ छाणवहि (B), छन्नवइ (C). १० पाँचतालीसह (B & C). ११ भणिज्जसु (D). १२ छहवीस (A & F), छअवीस (B), छअविस (C), छहवील (D). १३ उल्ला-लउ (A, B & C), उल्लाल (D & F). १४ एककरि (A, B & C). १५ मणऊ (A). १६ समवण्णहि (B), समवणुहि (C). १७ सरिसगुण (A), उसरिगुण (B), उपरिगुण (C), सरिसदोसगुण (F). १८ ए short, vide श्लोक ५, p. 7. १९ परिमुणऊ (B, C, E & F), परिमुणह (D). २० १५ (A), १० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



ऽधिकैः, श्लाघ्यतां कथ्यताम् ॥ चतुर्विंशतिमात्रैश्चतुर्भिः पादैः षण्णवति-र्मात्रा भवन्ति, तत्र चतुश्चत्वारिंशद्गुरवः सन्ति, पञ्चचत्वारिंशन्नामकं काव्यलक्षणं क्रियतामुल्लालपादयोर्मिलित्वा षड्विंशतिर्गुरवः सन्ति। अत्र च प्रतिपादं जगणस्थाने लघुद्वयमावश्यकं, तेन पादचतुष्टयेऽष्टौ लघव आवश्यकाः, अवशिष्टा अष्टाशीतिर्मात्राश्चतुश्चत्वारिंशद्गुरुभिः सम्भवन्ति, एवमुल्लालपादद्वये लघुचतुष्कमावश्यकं प्रतिपादं त्रिकल-गणद्वयस्य वक्ष्यमाणत्वात्। अवशिष्टा द्विपञ्चाशन्मात्राः षड्विंशति-गुरुभिः सम्भवन्ति, तेन षट्पदे सप्ततिर्गुरवः सम्भवन्ति। किन्तु जगणस्थाने चतुर्लघुकरणाद्द्विपञ्चाशदधिकशतमात्राः केवललघुभि-रपि सम्भवन्ति, ततश्चैकैकगुरुवृद्धिक्रमेण सप्ततिर्गुरवः संभवन्ति। (C).

११७। अथ वर्णलघुभेदेन काव्यस्य जातिमेकैकचरणस्थां चरणचतुष्टयसमुदितां च मात्रां कथयन् भूयोऽपि भेदसंख्यामनु-वदन् उल्लालगुरुसंख्यामुपदिशन् काव्योल्लालाभ्यां षट्पदं वृत्तं भवति तस्य चैकसप्ततिर्भेदा भवन्तीति षट्पदेनैवाह विप्पेति। विप्प — विप्रे विप्रजातीये काव्ये बत्तीस — द्वात्रिंशत् लहू — लघवः होइ — भवंति, खत्ति — क्षत्रिये क्षत्रियजातीये काव्ये बेआल — द्विचत्वारिंशत् लघवः करिज्जसु — क्रियंतां, बेस — वैश्यः अटतालिस — अष्टचत्वारिंशत् लघवः क्रियंतामिति पूर्वेणै-वान्वयः, सेस — शेषा उर्वरिता इति यावत् लघवः सुद्दहि[उ] — शूद्रजातीये काव्ये सलहिज्जसु — श्लाघ्यंतां, पअ — पाद एकैक-चरण इत्यर्थः काव्यस्येति भावः चउअग्गल — चतुरधिकाः बीस — विंशतिः चरणचतुष्टये च इति शेषः, छाणवइ — षण्णवतिः मत्त

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



—मात्राः ठविज्जसु—स्थाप्यंतां, कब्बलक्खणहि[ह]—काव्यलक्षणे पंचतालीसह णाम—पंचचत्वारिंशन्नामानि पूर्वोक्तानि शक्रादीनि भृंगांतानीति भावः करिज्जसु—क्रियंतां, उल्लालहि—उल्लाले छहबिस—षड्विंशतिं गुरून् जानीहीति शेषः, विण्णि पात्र—द्वयोः पादान् काव्योल्लालयोश्चरणान् एक्ककइ—एकीकृत्य, सम-वस—समा वर्णाः काव्योल्लालसमानाः वर्णा गुरुलघुरूपा यस्मि-न्तत्तादृशमित्यर्थः सरिससमदोसगुण—सदृशसर्वदोषगुणं सदृशाः काव्यसमानाः सर्व्वे दोषा गुणाश्च यस्य तत्तादृशमित्यर्थः छप्पअ—षट्पदं वृत्तं मुणऊ—जानीत, तस्य चेति शेषः एहत्तरि णाम—एकसप्ततिनामानि परिमुणऊ—परिजानीतेति योजना। एह-त्तरीत्येकारो लघुर्बोध्यः। अयमर्थः—काव्यचरणचतुष्टयस्याश्चतु-श्चत्वारिंशत् गुरवस्तृतीयजगणदानपक्षे चाष्टौ लघवः, उल्लालचरण-द्वयस्याश्च षड्विंशतिर्गुरवः, पादद्वयस्थत्रिकलचतुष्टयांतर्गताश्च चत्वारो लघ[व] एवं मिलित्वा सप्ततिर्गुरवो द्वादश लघवश्च षट्पदे पतंति, तत्र चैकैकगुरुह्रासेन क्रमेण तत्समानसंख्याकलघुद्वयवृद्धा एकसप्ततिर्भेदा भवंति। तांश्च भेदाननुपदमेव प्रपंचयिष्याम इति सुधीभिर्ध्येयम्। (E).

११७। जातिभेदमाह॥ विप्पेति॥ विप्रा भवति द्वात्रिंशद्भिः, क्षत्रिया द्विचत्वारिंशद्भिः॥ अष्टचत्वारिंशद्भिर्वैश्या, शेषैः शूद्रि[द्रा]णी ज्ञाप्यतां॥ चतुरधिका पदे विंशतिर्मात्राः, षण्णवतिः स्थाप्यतां॥ चरणचतुष्टये इत्यर्थः॥ पञ्चचत्वारिंशन्नामानि काव्यलक्षणस्य क्रियंतां॥ सर्वलघुशक्रभेदेन सहेत्यर्थः॥ षड्विंशतिमुल्लालस्यैकीकृत्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



अह उल्लाल लक्खण[1]। (B).

तिसि[2] तुरंगम तिअल[3] तह[4] छह[5] चउ तिअ तह[6] अंत[7]।
एम उल्लाल[8] उट्टवहु[9] बिहु[10] दल छप्पण मत्त॥११८[11]॥
दोहा।

---

द्वौ पादौ षट्पदे जानीत॥ उल्लालचरणद्वये लघुचतुष्टयं षड्विंशतिगुरूंश्चैकीकृत्य चरणद्वयमेवं षट्पदं जानीतेत्यर्थः॥ समवर्णसदृशदोषगुणनामानि एकसप्ततिं परिजानीत॥ अत्र यथा काव्यदोषास्तथा उल्ला[ल]स्यापि भवंति॥ एवं [पंच]चत्वारिंशत्काव्यभेदाः षड्विंशतिरुल्लालस्येति एकसप्ततिर्भेदा इत्यथ उल्लालेऽपि एकसप्ततिर्भेदा भवंतीत्यर्थः॥ (G).

११८। अथोल्लाले गणनियममाह। त्रयस्तुरङ्गमास्त्रिकलगणस्तथा षट् चत्वारस्त्रयस्तथा अन्ते, एवमुल्लाल उत्थाप्यतां षट्पञ्चाशन्मात्राः॥ तुरङ्गमशब्दश्चतुष्कलवाची, ततः त्रिकलः, ततः षट्कलस्ततश्चतुष्कलः ततस्त्रिकलः एवमष्टाविंशतिकलः पादः, दलद्वयेन च षट्पञ्चाशन्मात्रा भवन्ति॥ (C).

११८। अथ षट्पदोपोद्घातेनोल्लालं लक्षयति तिसि तुरंगमेति। प्रथमं तिसि[—त्रयः] तुरंगमाश्चतुष्कला गणाः, तह — ततः, तिअल

---

११८। १ अथोल्लाललक्षणं (A), अथ उल्लाललक्खण (C), अथोल्लाल (D). २ तिणि (A & D). ३ तीअ (F). ४ लऊ (F). ५ छअ (B & C), छउ (F). ६ लऊ (B), तिलऊ (C), तेहि (E). ७ अणु (C), अंते (E). ८ उल्लाला (A, B & D). ९ संठ (A) उट्टरण (B & C). १० विह (D). ११ ११ (A), १८ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



— त्रिकलः गणः, तेहि अंत — तस्य त्रिकलस्यांते छह चउ तिअ — षट् चतस्रः तिस्रः मात्रा इति शेषः प्रत्येकं योजनीयः, एम — एवं, बिहु दल छप्पण मत्त — द्विदलषट्पंचाशन्मात्राकं द्वयोर्दलयोर्मिलिला षट्पंचाशन्मात्रा यस्य तत्तादृशमित्यर्थः, उल्लाल — उल्लालं उल्लालनामकं वृत्तं, उट्टवहु — उट्टवयत उट्टवनिकाविषयं कुरुतेति यावत्। अथवा षट्पंचाशन्मात्राकमुल्लालं बिहु दल — द्वयोर्दलयोरुट्टवयत, एम — [ए]वं दलद्वयेऽपि गणान् विभजत ॥ इदमत्रावधेयम्। त्रिचतुष्कलानां षट् गुरवस्तदनंतरपतितस्य त्रिकलस्य च एको गुरुस्तदनंतरपतितस्य षट्कलस्य च त्रयोगुरवस्तदनंतरपतितस्य चतुष्कलस्य च गुरुद्वयं तदनंतरपतितस्य त्रिकलस्य चैको गुरुरेवं प्रतिचरणं त्रयोदशगुरवो लघुद्वयं चैवमष्टाविंशतिर्मात्राः एके दले पतंति, दलद्वये च मिलिला षड्विंशतिर्गुरवस्त्वारश्च लघवः एवं षट्पंचाशन्मात्राः पतंति। एवं च काव्यवदुल्लालेऽपि सर्वे वर्णा गुरुरूपा न संभवंति। तथा हि यदि त्रिकलो गुर्वादिस्तदंतो वा दीयते, तदा एकैकपादे त्रिकलद्वयांतर्गतं लघुद्वयमावश्यकं, द्वयोर्दलयोश्च लघुचतुष्टयं, यदि च त्रिकलस्य मात्रात्रयमपि लघुरूपमेव क्रियते, तदा तु त्रिकलद्वयस्य षट् लघ[व] एकैकचरणे, द्वयोर्दलयोश्च द्वादश लघवः आवश्यका इति कथमपि उल्लाले सर्वे वर्णा गुरुरूपा न संभवंत्येव, लघुरूपास्तु संभवंत्येव, त्रिकलानामपि सर्वलघुरूपाणां संभवादत एव क्वचित्सर्वगुर्वात्मकवर्णसमय[?]मुदाहरणमपि दृश्यते तल्लेखकप्रमादात्पतितमिति बोध्यम्। अत्राप्येकैकगुरुह्रासेन क्रमेण लघु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा[1], जाआ जा अद्धंग[2] सीस[3] गंगा लोलंती
सव्वासा पूरंति सव्व[4] दुक्खा[5] तोलंती ।
णाआ राआ हार[6] दीस[7] बासा भासंता[8]
वेआला जा संग[9] णट्ठ[10] दुट्ठा[11] णासंता ॥
णाचंता[12] कंता उच्छ्वे[13] ताले भूमी कंपले ।
जा दिट्ठे मोक्खा पाबिज्ज[14] सो तुम्हाणं सुक्ख[15] दे[16] ॥
११९[17] ॥ [छप्पअ]

---

इयवृद्धा सर्वलघ्वन्ताः सप्तविंशतिर्भेदाः संभवंति, ते च ग्रंथकृता न प्रदर्शिताः, अप्रदर्शिता अपि स्वयमूहनीयाः, मया तु ग्रंथविस्तर-भयान्न प्रदर्शिता इति सुधीभिर्विभावनीयम् । (E).

११८ । अथोल्लाललक्षणमाह ॥ तिणीति ॥ त्रयस्तुरंगमास्त्रिकलः षट्कलश्चतुष्कलस्त्रिकलस्तस्यांते ॥ एवमुल्लालमुद्द्वयंतु द्वयोर्दलयोः षट्पंचाशन्मात्राः ॥ तुरंगमश्चतुर्लघुः ॥ (G).

११९ । तत्र सर्व्वगुरुमुदाहरति । जाया यस्यार्द्धाङ्गे, अङ्गे गंगा लोलते, सर्व्वाशाः पूरयति यः सर्व्वाणि दुःखानि त्रोटयति, नागराजहारः दिशो वासः भासते, वेताला यस्य सङ्गे नष्टान्

---

११९ । १ सव्वगुरु जहा (E). २ अद्धंगे (A & C), जाआधंगे (D). ३ Dropt in (A), अङ्ग (B & C), सीसे (D). ४ सव्वा (A), सव्वतो (D). ५ दुःखं (B & C), दुखाँ (D). ६ हारा (A & D). ७ दीसा (A & D). ८ Dropt in (D), वासंता (E). ९ संगे (A, C & D). १० णट्ठा (A), dropt in (D). ११ उट्ठा (E). १२ णचंता (A). १३ उच्छवे (B, C & F). १४ पाविज्जे (A), पाविआ (B, C & D), पाइए (F). १५ सुक्खं (A), सुभ (B), तुम्भाणं सूब्भ (C), सुक्खा (D). १६ दो (D, E & F). १७ १६ (A), १९ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



दुष्टान् नाशयति। नृत्यति कान्तया[या] उच्चैर्वेतालैः भूमिं कम्पयन् यस्य दृष्ट्या मोक्षः प्राप्यते, स युष्माकं सुखं ददातु ॥ अत्र च प्रथमचतुर्थपादयोरेकारस्य वर्णमिलितस्य लघुत्वात् तृतीये जगणो न विरुध्यते, किन्तु आवश्यकलघुव्यतिरिक्तानां सर्व्वेषां गुरुत्वादस्य सर्व्वगुरुत्वमिति ध्येयं, न तु सर्व्व एव गुरुरिति भ्रमः कार्य्यः । (C).

११९ । अथ काव्योल्लालयोः सर्वगुर्वात्मकमाद्यभेदमुदाहरति जाआ जा अद्धंगेति। जा अद्धंग—यदर्द्धेऽंगे जाआ—जाया पार्वतीति यावत् शोभते इति शेषः, अग्रेऽपि योजनीयः, सीस—शीर्षे सव्वासा पूरंति—सर्वाशाः पूरयंती सव्वदुक्खा तोलंती—सर्व्वदुःखानि त्रोटयंती एतादृशी गंगा लोलंती—लोलायमाना। अत्र गंगाविशेषणद्वयं पार्वत्या अपि योजनीयम्। यस्स णाआ राआ हार—नागराजहारः नागराजस्य वासुकेर्हारो-यस्य तादृश इत्यर्थः। यस्स दीसवासा वासंता—दिग्वासो वसानः। जा संग—यत्संगे णट्ठ उट्ठा णासंता—नष्टदुष्टान् नाशयंतः, अत्र नष्टशब्दो धूर्त्तवाची, तथाच धूर्ता ये दुष्टा वैरिणस्तान् नाशयंत-इत्यर्थः, उच्छ्बे—उत्सवे कंता—कांतं यथा स्यात्तथा णाचंता—नृत्यंतः, ताले भूमी कंपले—तालकंपितभूमयः, अथवा येषां तालेन भूमिः कंपिता, तादृशा बेआला—वेतालास्तिष्ठंतीति शेषः। जा दिट्ठे—यस्मिन्दृष्टे मोक्खा पाविज्ज—मोक्षः प्राप्यते, सो तुम्हाणं—स युष्मभ्यं सुक्ख दो—सुखं ददातु। अत्र जाआ जा अद्धंगेत्यारभ्य णट्ठ उट्ठा णासंता एतावत्पर्यंतं पादचतुष्टयं काव्यस्योदाहरणमेतदग्रे च चरणद्वयमुल्लालस्येति बोध्यम्। (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**चउआलिस[1] गुरु कब्बके[2] छह[3]बीसउ[4] उल्लाल।**
**जं[5] गुरु टुट्टइ लहु[6] बढइ[7] एहत्तरि[8] पत्थार[9] ॥१२०[10]॥**
**दोहा।**

---

११९। अथ षट्पदस्य शाल्मलीप्रस्तारगतं सर्वगुरुभेदमुदाहरति॥ सर्वगुरुभेदो यथा॥ जाआ इति॥ जाया ज[य]स्यार्द्धांगे शीर्षे गंगा लुठंती, सर्वाशाः पूरयति सर्वदुःखानि त्रोटयति। नागराजो हारः दिग्वासो भासते, वेताला यस्य संगे नष्टदुष्टान्नाशयंति॥ नृत्यत्-[ति] कांतमुल्लवे ताले भूमिः कंपिता। यस्मिन्दृष्टे मोक्षः प्राप्यते, स युष्माकं सुखं ददातु॥ १९॥ (G).

१२०। एतदेव स्पष्टयन्नाह। चतुश्चत्वारिंशद्गुरवः काव्यस[स्य] षड्विंशतिरुल्लालस्य। यद्गु[रु]स्त्रुट्यति लघुर्वर्द्धते एकसप्ततिः प्रस्ताराः — काव्यच्छन्दसः॥ (C).

१२०। अथ षट्[पद]भेदानयनप्रकारमाह चउआलिसेति। चउआलिस गुरु कब्बके — [चतुः]चत्वारिंशद्गुरवः काव्यस्य, छहबीसह — षड्विंशतिर्गुरवः इत्यनुषंगः, उल्लाल — उल्लालस्य। जं गुरु टुट्टइ — यः गुरुस्त्रुटति, लहु बढइ — लघुर्वर्द्धते, अतः एहत्तरि — एक-सप्ततिः पत्थार — [प्रस्तारः] भेदेषणा भवतीति शेषः॥ भावस्तु पूर्वमेवोक्तः। (E).

---

१२०। १ चउआलीस (B & C), चउआल (D), चउवालो (F). २ कव्वक (F). ३ छच (B & C). ४ वीस गुरु (B), विस (C), वीसु (D), वीसह (E), वीस (F). ५ Non est (B & C). ६ वेलहु (A & B). ७ वलइ (A, B, & C). ८ एहत्तर (F). ९ पच्छार (A). १० १७ (A), २० (F).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ शाल्मली[ली]प्रस्तारः । (A).

अजअ बेआसी[1] अक्खर[2] गुरु सत्तरि रबि रेह ।
एक्कक्खर[3] चल[4] गुरु घटइ[5] दुइदुइ[6] लहुआ देह[7] ॥१२१[8]॥
दोहा ।

१२० । अथ भेदानयनप्रकारमाह ॥ चउ इति ॥ चतुश्चत्वारिंश-द्गुरवः काव्ये षड्विंशतिरुल्लाले । यथा गुरुस्त्रुट्यति लघुर्वर्धते एक-सप्ततिः प्रस्तारः ॥ सर्वलघुभेदेन सहैकसप्ततिर्भेदा भवंतीत्यर्थः ॥ २० ॥ (G).

१२१ । प्रस्तारं दर्शयति अजअ इति । अजये द्व्यशीत्यक्षराणि गुरवः सप्तती रविरेखाः । एकाक्षरं चलति गुरुस्त्रुटति द्वौ द्वौ लघू आनय ॥ एकसप्ततिप्रस्तारेषु प्राथमिकमजयनामकं छन्दः, तत्र द्विरशीत्यक्षराणि भवन्ति, तत्र सप्ततिर्गुरवः रविरेखा द्वादश लघवः, षट्सु पदेषु एकसप्ततिमध्ये एकमक्षरं चलति ह्रसति तेन गुरुस्त्रुट्यति तत्स्थाने लघुद्वयं स्थाप्यते, इत्येवंक्रमेणैकसप्ततिर्भेदाः भवन्ति । (C).

१२१ । अथैनमेवार्थं प्रकारांतरेणाह, अजअ इति । गुरु सत्तरि — गुरवः सप्ततिः, रबि रेह — रविरेखाः रविसंख्याका रेखाः

१२१ । १ वेआसि (C), वयासी (E), वेअसी (F). २ अक्खरह (A, B & C), अक्खरहि (E), अक्खरउ (F). ३ एकक्खर (B & F). ४ चलइ (A), चढ (D & E), चढइ (F). ५ घलइ (A, B & C). ६ दुइ (A), दुऊइ (C), एइमपरि (D), दुदुइ (E), दु तह दुइ (F). ७ देऊ (A), लेह (E & F). ८ १८ (A), २१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



अजअ[१] बिजअ[२] बलि कस[३] बीर बेआल बिहसरु[४]
मक्कलु[५] हरिहर बंभ[६] इंदु[७] चंदणु सुसुहंकरु[८] ।
साण[९] सीह[१०] सद्दूल[११] कुम्म कोइल खर[१२] कुंजरु
मअण[१३] मच्छ तालंक[१४] सेस सारंग[१४] पओहरु[१५] ॥
ता[१६] कुंद कमलु[१७] बारण[१८] भसल[१९]
सरहु[२०] जंगमु[२१] सर बिल हइ[२२] ।
सुसऊ[२३] समरु[२४] सारसु सरअ[२५]
छप्पअ[२६] णाम पिंगलु[२७] कहइ ॥ १२२[२८] ॥ छप्पअ ।

---

द्वादश लघव इति यावत्, एवं बयासी [बिआसी] अक्खरहि—द्व्यशीत्यक्षरैः अजअ—अजयनामा षट्पदस्य प्रथमो भेद इत्यर्थः । तत्र गुरु घटइ—एकैकगुरुर्ह्रसति, दुहुइ लहुआ लेइ[ह]—द्वौ द्वौ

---

१२२ । १ अजउ (B & C). २ विजउ (B, C & D), विच (E). ३ वष (A & B). ४ विहसलु (B), विहसल (A & C), विहसठ (E). ५ मक्कल (A & C). ६ वम्ह (B). ७ इन्द (B). ८ सुहल्कर (A), भयङ्कर (C), सुसहंकार (D), सुहंकरु (F). ९ साणु (A), साल (C). १० सिंह (D & F). ११ सदूल (D). १२ खरु (B & C). १३ अमण (F). १४ Transposed in (B & C). १५ हर (A, E & F). १६ Non est (E). १७ कमल (A, B & C). १८ बाल (C). १९ भसण (B & C), dropt in (D & F), transposed in (E). २० सुरऊ (A), सरह (C). २१ अअगर (A), अजंग (B), मिअंक (C), जंगम (D), जंगलु (E). २२ लठ लहइ सर (A), णुठ बिलहइ सर (B), सर विल विअइ (C), जइअ इवि लहइ सर (D), इअ ठवि लेहइ (E), जइइइ द्दा सर (F). २३ Dropt in (B), सर (C), सुसर (D, E & F). २४ Dropt in (B), पुक्खर (C). २५ सरऊ (A), dropt in (B & C), सरसु (E). २६ छप्प (C). २७ पिंगल (A, B & C). २८ १९ (A), २२ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



लघुकौ ग्राह्यौ वर्द्धनीयाविति यावत् । एवं सति एक्कक्खर चढ— एकैकमक्षरं वर्द्धते [* *] ॥ अयमर्थः । तृतीयजगणपक्षे काव्यस्य [चतुः]चत्वारिंशद्गुरवः अष्टौ लघव उल्लालस्य षड्विंशतिर्गुरवश्चत्वारो-लघव एवमुभयोर्मिलित्वा सप्ततिर्गुरवो द्वादश लघवो यत्र पतंति स अजयः, तत्र च यदि एकैको गुरुर्ह्रसति तत्समानसंख्याक-मात्राकं च लघुद्वयं वर्द्धते, एवं च पूर्वपूर्वभेदापेक्षयोत्तर[रोत्तर]-भेद एकैकमक्षरं वर्द्धते तदा ते ते भेदा भवंति । एतस्यैव प्रस्तारस्य शाल्मलीप्रस्तारसंज्ञा । (E).

१२१ । अस्य शाल्मल्यभिधस्य प्रस्तारस्य विशेषमाह ॥ अजेति ॥ अजये द्व्यशीत्यक्षराणि, गुरवः सप्ततिः, रवयो रेखाः ॥ एकाक्षरं वर्धते, गुरुस्त्रुट्यति, तदा द्वौ द्वौ लघू गृहाण ॥ अजयनाम्नि भेदे द्व्यशीत्यक्षराणि भवंति ॥ तत्र सप्ततिर्गुरवो द्वादश लघव इति ॥ (G).

१२२ । अथैकसप्ततिभेदानां नामान्याह । अजयो विजयो बलिः कर्णो वीरो वेतालो बृहन्नलो मर्कटो हरिहरौ ब्रह्मा इन्द्रश्चन्दनं भयंकरः शालः सिंहः शार्दूलः कूर्मः कोकिलः खरः कुञ्जरो मदनो मत्स्यः सारङ्गः शेषताड़ङ्कः पयोधरः कुन्दं कमलं बालभसनः सरभः मृगाङ्कः शरं विलं हितं[?] सरः पुष्करः समरं सारं सुकरः षट्पदे नाम पिंगलः कथयति ॥ (C).

१२२ । अथैकसप्ततिभेदानां नामान्याह अजअ इत्यादिना । अजयः १, विजयः २, बलिः ३, कर्णः ४, वीरः ५, वेतालः ६, बृहन्नटः ७, मर्कटः ८, हरिः ९, हरः १०, ब्रह्मा ११, इंदुः १२, चंदनं १३, सुशुभंकरः १४, श्वा १५, सिंहः १६, शार्दूलः १७, कूर्मः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



मेरु मञ्चरु[१] मञ्च सिद्धि बुद्धि करञ्चलु[२] कमलाञ्चरु[३]
धवल[४] मलउ[५] धुञ्च कणउ[६] किसणु[७] रंजणु[८] मेहाञ्चरु[९]।
गिम्ह[१०] गरुड[११] ससि सूर सल्ल[१२] णवरंग मणोहरु[१३]
गञ्चणु[१४] रञ्चणु[१५] णरु[१६] हीरु[१७] भमरु[१८] सहेरु कुसुमाञ्चरु[१९]॥
ता दिप्पु[२०] संखु[२१] बसु सद्द[२२] मुणि णाञ्चराञ्च पिंगलु[२३] कहइ।
छप्पञ्च[२४] णाम[२५] एहत्तरिहि[२६] छंदञ्चार पत्थरि[२७] लेहइ[२८]॥
१२३[२९] ॥ छप्पञ्च ।

---

१८, कोकिलः १९, खरः २०, कुंजरः २१, मदनः २२, मत्स्यः २३, ताडंकः २४, शेषः २५, सारंगः २६, पयोधरः २७, कुंदः २८, कमलं २९, वारणः ३०, शरभः ३१, भसलो—भ्रमरः भास्करश्च ३२, जांगलः ३३, शरः ३४, सुसरः ३५, समरं ३६, सारसः ३७, सरसः ३८, दूञ—द्वति छप्पञ्च णाम—षट्पदनामानि ठवि—

---

१२३। १ मञ्चर (E). २ कलञ्चरु (A). ३ कमलाकरु (E, कमलारु (F). ४ धवलु (B & C). ५ मणउ (D & F), मञ्चण (E). ६ कण (A & B), धञ्च (C), कणञ्च (E). ७ किसउणु (A), किसइ (B), किसञ्च (C), कीसणु (F). ८ रंजण (A). ९ मेहासु (E). १० गिह्म (A & D), गीम्ह (B). ११ गरल (A), गरुल (B & C). १२ सलण (A), मन्द (C). १३ पञ्चोहरु (A). १४ गञ्चण (A), गञ्चसु (D). १५ रञ्चण (A), रञ्चसु (D). १६ रणु (D). १७ हारु (A). १८ भमारु (D). १९ कुसुञ्चाञ्चरु (B). २० ता दीप्पु (B), ता दिप्प (C & F), ता दिप्पं (E). २१ संख (D), स (E). २२ सकु (B), सद्द (C). २३ पिंगल (A & F). २४ छप्पञहँ (D), छप्पइ (E). २५ णाम (B). २६ एहत्तरहि (B & C). २७ पत्थरि (A). २८ लहइ (A & D), किज्जइ (B & C), कहइ (F). २९ १० (A), १३ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



स्थापयित्वा लेहइ—लभ्यंत इति पिंगल कहइ—पिंगलः कथयति ॥ (E).

१२२ । अथ नामान्याह ॥ अजयः १, विजयः २, बलिः ३, कर्णः ४, वीरः ५, वेतालः ६, वृहन्नलः ७, मर्कटः ८, हरिः ९, हरः १०, ब्रह्मा ११, इंदुः १२, चंदनं १३, शुभंकरः १४, श्वा १५, सिंहः १६, शार्दूलः १७, कूर्मः १८, कोकिलः १९, खरः २०, कुंजरः २१, मदनः २२, मत्स्यः २३, तालंकः २४, शेषः २५, सारंगः २६, पयोधरः २७, ततः कुंदं २८, कमलं २९, वारणः ३०, शरभः ३१, जंगमः ३२, द्युतीष्टः ३३, दाता ३४, शरः ३५, सुशरः ३६, समरं ३७, सारसः ३८, सरटः ३९, षट्पदनामानि पिंगलः कथयति ॥ २२॥ (G).

१२३ । मेरुः मकरः मृगः सिद्धिर्बुद्धिः करतलं कमलाकरः धवलो मलयो ध्रुवो धर्म्मः किशलयो व्यजनं[?] मेधाकरः ग्रीष्मः गरलं[?] शशी सूरः मन्दो नवरङ्गः मनोहरो ग[ग]नं रत्नं नरः हीरं भ्रमरः शेखरः कुसुमाकरः ततो द्वीपः शङ्खः वसुः सत्यः शृणु नागराजपिङ्गलः कथयति षट्पदनामान्येकसप्तति छन्दसां परं कथयति ॥ (C).

१२३ । मेरुः ३९, मकरः ४०, मदः ४१, सिद्धिः ४२, बुद्धिः ४३, करतलं ४४, कमलाकरः ४५, धवलः ४६, मदनः ४७, ध्रुवः ४८, कनकं ४९, कृष्णः ५०, रंजनः ५१, मेधाकरः ५२, ग्रीष्मः ५३, गरुड़ः ५४, शशी ५५, शूरः ५६, शल्यं ५७, नवरंगः ५८, मनोहरः ५९, गगनं ६०, रत्नं ६१, नरः ६२, हीरः ६३, भ्रमरः ६४, सेखरः ६५, कुसुमाकरः ६६, द्विपः ६७, शङ्खः ६८, वसुः ६९, शब्दः ७०,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**जत्ते[1] सव्वहि[2] होइ लहु अद्ध बिसज्जहु[3] ताम[4] ।**
**तह बि[5] बिसज्जहु[6] एक्कसरु[7] एहि[8] पमाणे[9] णाम ॥ १२४[10] ॥**
**दोहा । इति षट्पदप्रकरणम् ॥**

---

मुनिः ७१, इति एहत्तरिहि — एकसप्ततिः षट्पदनामानि छंद-आर — छंदःकारकः पत्थरि — प्रस्तार्य लेहइ — लभते, इति पिंगलः कहइ — कथयति ॥ (E).

१२३ । मेरु इति ॥ मेरुः ४०, मकरः ४१, मदः ४२, सिद्धिः ४३, बुद्धिः ४४, करतलं ४५, कमलाकरः ४६, धवलः [४७,] म[द]नः ४८ ध्रुवः ४९, कनकं ५०, कूर्म्मः[?] ५१, रंजनः ५२, मेधाकरः ५३, ग्रीष्मः ५४, गरुडः ५५, शशी ५६, सूर्यः ५७, शल्यं ५८, नवरंगः ५९, मनोहरः ६०, गगनं ६१, रत्नं ६२, नरः ६३, हीरः ६४, भ्रमरः ६५, शेखरः ६६, कुसुमाकरः ६७, ततः दीपः ६८, शंखः ६९, वसुशब्दः ७०, सुनिः ७१ ॥ नागराजः पिंगलः कथयति ॥ षट्पदे नामान्येकसप्ततिः छंदस्कारः प्रस्तार्य्य कथयति ॥ २३ ॥ (G).

१२४ । तथाहि यावद्भवति सर्व्वैर्लघुभिरर्द्धं विसर्जय । तत्रापि एकं शरम् एतत्प्रमाणं नाम ॥ सर्व्वैर्लघुभिर्हि[र्द्वि]पञ्चाशदधिकं [शतं] तस्यार्द्धदूरीकरणे षट्सप्ततिरवशिष्यते । तत्रैकपञ्चसंख्यायां

---

१२४ । १ जेत्ते (B, C & E), जते (D), ऊत्ते (F). २ सव्वइ (B & C). ३ विसज्जइ (B & C), विसज्जहिँ (D). ४ तासु (F). ५ पुणवि (A), तहँवि (D). ६ विसज्जइ (B & C), विसज्जहिं (D), विसज्जहँ (E), विसज्जउ (F). ७ एक्कवसर (B), एक्कनर (C & F). ८ एह (A), एम (B & C). ९ पमाणेहि (B & C), परमाणे (D). १० ९१ (A), २५ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



दूरीकृतायामेकसप्ततिनामानि भवन्तीत्यर्थः। इति षट्पदप्रकरणम् ॥ (C).

१२४। अथैतेषां प्रकारांतरेण संख्यामाह जत्ते इति। यावंतः सर्व्वे लघवो भवंति अर्द्धं विसृज्यतां तन्मध्ये। तत्रापि विसृज एकं शरं पंचकं, शर इति पंचसंज्ञा, एतत्प्रमाणेन नामानि विद्धीति शेषः ॥ अयमर्थः, द्विपंचाशदुत्तरं शतं लघवः अंतिमभेदे ये, तन्मध्ये अर्द्धत्यागे षट्सप्ततिरवशिष्यते, तत्र पंचत्यागे एकसप्ततिरवशिष्यते, तत्प्रमाणेन एकसप्ततिप्रमाणानि नामानि भवंतीत्यर्थः।

अथैते भेदाः स्वरूपतो लिखित्वा प्रदर्श्यंते। गुरु ७० लघु १२ अजयः, गुरु ६९ लघु १४ विजयः, गु ६८ ल १६ बलिः, गु ६७ ल १८ कर्णः, गु ६६ ल [२०] वीरः, गु ६५ ल २२ वेतालः, गु ६४ ल २४ बृहन्नटः, गु ६३ ल २६ मर्कटः, गु ६२ ल २८ हरिः, गु ६१ ल ३० हरः, गु ६० ल ३२ ब्रह्मा, गु ५९ ल ३४ इंदुः, गु ५८ ल ३६ चंदनं, गु ५७ ल ३८ शुभंकरः, गु ५६ ल ४० श्वा, गु ५५ ल ४२ सिंहः, गु ५४ ल ४४ शार्दूलः, गु ५३ ल ४६ कूर्मः, गु ५२ ल ४८ कोकिलः, गु ५१ ल ५० खरः, गु ५० ल ५२ कुंजरः, गु ४९ ल ५४ मदनः, गु ४८ ल ५६ मत्स्यः, गु ४७ ल ५८ ताडंकः, गु ४६ ल ६० शेषः, गु ४५ ल ६२ सारंगः, गु ४४ ल ६४ पयोधरः, गु ४३ ल ६६ कुंदः, गु ४२ ल ६८ कमलं, गु ४१ ल ७० वारणः, गु ४० ल ७२ शरभः, गु ३९ ल ७४ भसलः, गु ३८ ल ७६ जांगलः, गु ३७ ल ७८ शरः, गु ३६ ल ८० सुसरः, गु ३५ ल ८२ समरं, गु ३४ ल ८४ सारसः, गु ३३ ल ८६ सरसः,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ पज्झटिका छंदः । (D).

चउ[1]मत्त करह[2] गण चारि ठाइँ[3]
ठइ अंत[4] पओहर पाइँ पाइँ ।
चउ[5]सट्ठि[6] मत्त पज्झलइ[7] इंदु
सम[8] चारि पाअ पज्झटिअ[9] छंदु ॥ १२५[10] ॥

---

गु ३२ ल ८८ मेरुः, गु ३१ ल ९० मकरः, गु ३० ल ९२ मदः, गु [२९ ल ९४ सिद्धिः, गु २८ ल ९६] बुद्धिः, गु २७ ल ९८ करतलं, गु २६ ल १०० कमलाकरः, गु [२५ ल] १०२ धवलः, गु २४ ल १०४ मदनः, गु २३ ल १०६ ध्रुवः, गु २२ ल १०८ कन[न]कं, गु २१ ल ११० कृष्णः, गु २० ल ११२ रंजनः, गु १९ ल ११४ मेधाकरः, गु १८ ल ११६ ग्रीष्मः, गु १७ ल ११८ गरुडः, गु १६ ल १२० शशी, गु १५ ल १२२ शूरः, गु १४ ल १२४ शल्यं, गु १३ ल १२६ नवरंगः [गु १२ ल] १२८ मनोहरः, गु ११ ल १३० गगनं, गु १० ल १३२ रत्नं, गु ९ ल १३४ नरः, गु ८ ल १३६ हीरः, गु ७ ल १३८ भ्रमरः, गु ६ ल १४० शेखरः, गु ५ ल १४२ कुसुमाकरः, गु ४ ल १४४ द्विपः, गु ३ ल १४६ शंखः, गु २ ल १४८ वसुः, गु १ ल १५० शब्दः, ल १५२ मुनिः ॥ ७१ ॥ (E).

---

१२५ । १ चौ (E). २ करहि (D & E), करउ (F). ३ मह (D), थारि (F). ४ थांत (E). ५ चौ (E & F). ६ सट्ठि (C). ७ पजझरइ (B, C, D & E). ८ एम (A, B, C, D & E). ९ पज्झलिअ (A, B & C). १० ९९ (A), २१ (F).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१२४ । पुनः प्रकारांतरेण नामसंख्या[न]यनमाह ॥ जत्ते इति ॥ यावंतः सर्वे भवंति लघवः अर्धं विसर्जय तेषु । तत्रापि विसर्ज्ज-येकवारं शरान् अनेन प्रमाणेन नामानि ॥ यथा षट्पदसर्वलघवः १५२, तेषामर्धं ७६, तत्रापि [५] पंच त्याज्याः, अवशिष्टाः ७१ इति प्रकारेण जातानि नामानीत्यर्थः ॥ इति षट्पदप्रकरणम् ॥ (G).

१२५ । अथ प्रोज्झटिकाच्छन्दः ॥ चतुर्मात्राः क्रियन्तां गणा-श्चत्वारः अन्ते पयोधरः स्थाप्यतां पादे पादे । चतुःषष्टिमात्रं प्रज्झ-रतीन्दुरिव चतुर्भिः पादैः प्रोज्झटिकाच्छन्दः ॥ पादे पादे चतुर्मा-त्राश्चत्वारश्चत्वारो गणाः क्रियन्तां, तत्रान्त्यो गणो मध्यगुरुः, पयो-धरशब्दो मध्यगुरुवाची । यथेन्दुरमृतं प्रोज्झति, एवं प्रोज्झटिक-शब्दोऽप्यमृतं चरतीत्यर्थः ॥ पज्झटिकेति केचिद्वदन्ति ॥ (C).

१२५ । अथ पज्झटिकावृत्तं लक्षयति चउमत्तेति । अंत — अंते, पओहर — पयोधरं मध्यगुरुं जगणमिति यावत् ठइ — स्थाप-यित्वा, अंतस्थं चतुर्मात्रिकं जगणस्वरूपमेव विधायेत्यर्थः, पाइ पाइ — पादे पादे प्रतिचरणमिति यावत् चारि ठाइ — चतुः-संख्याकान् चउमत्त — चतुर्मात्रिकान् गणान् करहि — कुरुष्व । एम — एवं, चारि पाअ — चतुःपादे चउसट्ठि मत्त — चतुःषष्टि-मात्राकं पज्झटिअ छंद — पज्झटिकाच्छंदः भवति, एतत् शुलेति शेषः इंदुः पज्झरइ — प्रस्रवति ॥ प्रथमं त्रयश्चतुष्कलास्तदनंतरमेको-जगण एवं षोडश मात्राः प्रतिचरणं यत्र पतंति, तत्पज्झटिका-वृत्तमिति फलितार्थः ॥ (E).

१२५ । अत्र चतुःषष्टिमात्रकं भेदत्रयं, तत्र पर्यटिकामाह ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, जे गंजिअ गोलाहिवइ[1] राउ[2]
उद्दंड[3] ओड्ड[4] जसु[5] भअ[6] पलाउ[7] ।
गुरुबिक्कम बिक्कम जिणिअ[8] जुज्झ[9]
ताकसु परक्कम[10] कोइ[11] बुज्झ ॥ १२६[12] ॥
पज्झलिआ[13] । (A & F).

---

चउ इति ॥ चतुर्मात्राः कार्या गणाश्चलारश्चलारः स्थापयांते पयोधरं पादे पादे ॥ चतुःषष्टिमात्राभिः पर्यटिका भवति इंदुसमाश्चलारः पादाः पर्यटिकाच्छंदसि ॥ अंत इति ॥ चतुर्थो गणोजगणरूपः कार्य इत्यर्थः ॥ २६ ॥ (G).

१२६ । उदाहरति ॥ यो गञ्जितगौडाधिपतिराजः उद्दण्डओड्रो यस्य भयेन पलायते । गुरुविक्रमं विक्रमं जिला युध्यते तत् कर्णपराक्रमं क इह बुध्यते ॥ ओड्रः—ओड्रदेशीयो राजा, विक्रमं राजानं युद्धे न त्यजतीत्यर्थः । (C).

१२६ । अथ [प]ज्झटिकामुदाहरति जे इति । येन पराक्रमेण गोलाहिवइ—गौडाधिपतिः राउ—राजा गंजिअ—गंजितः, हत इति यावत्, जसु भअ—यस्य पराक्रमस्य भयेन उद्दंड

---

१२६ । १ गउलाहिव (A), गोड्डाहिवइ (B), गोलथ्थहिवइ (C), गोउवइ (F). २ बाउ (D). ३ उड्डुउ (D). ४ दंड (A), ओज्झ (C), ओड (E), मोड्ड (F). ५ इस (D & F). ६ जस (A), भए (B & C). ७ पसाउ (A), पलाइ (B), पराउ (D & F). ८ जिणु (A), जोणिअ (C), जिणिअ (D). ९ जज्झ (F). १० परिक्कम (B). ११ इह (C). १२ २२ (A), २० (F). १३ पज्झटिका (B & C), इति पज्झलिआ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथाडिल्ला छंदः । (D).

सोलह[1] मत्ता पाउअलि लह[2]
वेबि जमक्का[3] भेउ अलिल्लह[2] ।
हो ण[4] पओहर[5] किंपि अलिल्लह[2]
अंत सुपिअ[6] भण[7] छंदु[8] अलिल्लह ॥ १२७[9] ॥

---

—समरदुर्द्धर्षः ओड—उत्कलदेशाधिपतिः पलाउ—पलायितः। येन च जुज्झ—युद्धे, इदं सर्वत्र चेति, गुरुविक्कम—गुरुविक्रमः गुरुरन्यैरनतिक्रमणीयः विक्रमः पराक्रमो यस्य स तादृश इत्यर्थः, विक्कम—विक्रमः विक्रमनामा कश्चित्प्रसिद्धः राजा, जिणिअ—जितः, ताकस परक्कम—तत्कर्णपराक्रमं कोऽपि बुज्झ—जानाति, अपि तु न कोऽपीत्यर्थः ॥ (E).

१२६ । यथा ॥ येन गंजितो गौडपतिः राजा, बङ्गः[?] उत्कलः सभयं पलायितः। गुरुविक्रमो विक्रमो जितो युद्धे कर्णपराक्रमं को बुध्यते ॥ २७ ॥ (G).

१२७ । षोडश मात्राः पादावली लभते द्वयोर्यमकं भेदं कलयत। भवति पयोधरः किमप्यलं ह अंते सुप्रियः भण छन्दोऽलिन्दाम् ॥ पादावली पादचतुष्टयं षोडश मात्राः लभते, तथाच

---

१२७। १ सोलंह (A), सोलाह (E). २ अडिल्ल (D). ३ जमक्का (F). ४ होइ (A, B & C). ५ पयहर (E), पयोहर (F). ६ सुपिअ अंत (A, B & C), सुपिअंते (D), सुपिअ अंते (F). ७ जह (D, E & F). ८ छंद (A & B). ९ २४ (A). २८ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



षोडशमात्रं पदमित्यर्थः, द्वयोर्द्वयोरन्ते यमकं, भेदं विशेषं कलयत जानीत, पयोधरो जगणो भवति चेत्, किमपि क्वचिदपीत्यर्थे अलं व्यर्थं, तस्माज्जगणो न देय इत्यर्थः। ह-शब्दः पादपूरणे। सुप्रियो द्विकलः सर्व्वलघुः। तत्र चतुष्कलगणत्रयं, ततो द्विकलगणस्ततो द्विलघुरिति साम्प्रदायिकी परिपाटी । (C).

१२७। अथ अडिल्लहवृत्तं लक्षयति सोलह मत्तेति। जहा, सोलह मत्ता — षोडशमात्रिकाः षोडश मात्रा यस्यां सा तादृशीत्यर्थः, पाउअलि — पादावली, लह — लभ्यते, बेवि — द्वयोरिति शेषः, जमक्का — ज[य]मकौ भेउ — भवत इति, अलिल्लह कथयेत्यर्थः। किंपि कुत्रापि चरणे इत्यर्थः, अलील्लह[?] — अप्रयोजकइत्यर्थः। अयं च देशीशब्दः। पओहर — पयोधरः मध्यगुरुर्जगण इति यावत्, ण हो — न भवति, अत्र जगणो न देय इति भावः, अंते पादांते सुपिअ — सुप्रियः द्विलघुर्गण इत्यर्थः पततीति शेषः। क्रियमाणासु षोडशमात्रासु अंतिम[मा]त्राद्वयं यत्र लघुरूपमेव पतति, न तु षोडशमात्रातिरिक्तः सुप्रियो देय इति भावः, तत् अलिल्लह छंदु — अलिल्लहनामकं छंदः भण — कथय इत्यर्थः ॥ (E).

१२७। सोलेति॥ षोडश मात्राः पादावली लभतां द्वेअपि यमके भेद इति गृह्यतां॥ भवति पयोधरः किमपि अश्लाघ्यः सुप्रियोऽंते यत्र छंदः अलिल्लह॥ प्रतिपादं षोडश मात्राः, द्वयोश्चरणयोर्यमकं, जगणो न कर्त्तव्यः, अंते लघुद्वयं च, तत् अभि[लि]ल्लह छंदइत्यर्थः ॥ २८ ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, जहि[१] आसावरि[२] देसा[३] दिण्हउ[४]
सुत्थिर[५] डाहर[६] रज्जा लिह्लउ[७] ।
कालंजर[८] जिणि[९] कित्ती[१०] थप्पिअ[११]
धणुआ[१२] बज्जिअ[१३] धम्मक[१४] अप्पिअ[१५] ॥ १२८[१६] ॥

अलिल्लह । (F).

---

१२८ । येनाशापूर्य्यै देहो दत्तः सुस्थिरडाहरराज्यं गृहीतं । कालञ्जरं जित्वा कीर्त्तिः स्थापिता धनदारराज्यं धर्म्मायार्पितम् ॥ आशापूरी काचन देवी, डाहरो देशविशेषः । (C).

१२८ । अथ अलिल्लहमुदाहरति जिह्नि इति । जिह्नि — येन आसावरिनामको देशः, दिह्लउ — दत्तः, सुत्थिर — सुस्थिरं, वैरिकृतास्कंदनाभावादव्याकुलजनमिति भावः, डाहर रज्जा — डहार-राज्यं डहारः पर्वतविशेषस्तस्य राज्यमित्यर्थः, लिह्लउ — गृहीतं । कालिंजरे येन कीर्त्तिः स्थापिता, धण आवज्जि — धनम् आवर्ज्य दशदिग्भ्य एकीकृत्येत्यर्थः, धम्मके — धर्माय अप्पिअ — अर्पितम् ॥ अत्र दिह्लउ लिह्लउ, थप्पिअ अप्पिअ इति दलद्वये यमकवत्त्वं स्फुटमेव ।

---

१२८ । १ जिण्हि (B & C), जिहिँ (D), जिन्हि (E). २ असा (B), असापरि (C). ३ देहा (A, B & C). ४ दिन्नउ (C), दिह्लउ (F). ५ सुत्थिर (A), दुत्थिर (B). ६ डाहल (B). ७ लिह्लउ (A), णिण्हउ (B), णिणउ (C), लिण्हउ (D). ८ कालिंजर (A). ९ जिणि (F). १० कीत्ती (C). ११ तप्पिअ (D), थप्पीअ (E). १२ धणआ (A & B), धन्नअ (C). १३ वज्जीअ (E). १४ धम्मके (A, D & E). १५ अपिअ (B), अप्पिज (D). १६ १५ (A), १९ (F).

6339.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



लहु[1] गुरु[1] एक्क[2] णिअम[3] णहि जेहा[4]
पअ पअ लेक्खउ[5] उत्तम[6] रेहा ।
सुकइ फणिंदह कंठह[7] वलअं
सोलह[8] मत्तं[9] पाआउलअं[10] ॥ १२९[11] ॥

अत्र जिह्नीति संयुक्तपरोऽपि जकारः लघुर्बोध्यः, 'कत्थवि संजुत्तपरो वण्णो लहु होइ', इति पूर्वमुक्तत्वात् । [Vide श्लोक ४, p. ६. —Ed.] धम्मके इति एकारोऽपि लघुर्बोध्यः, 'एओ शु[सु]द्धाअ वण्ण मिलिआ वे'ति पूर्वमुक्तत्वात् । [Vide श्लोक ५, p. 7. —Ed.] अन्यथा तत्तच्चरणे मात्राधिक्यं स्यादिति बोध्यम् । (E).

१२८ । यथा ॥ जह्नीति ॥ येनाग्रावरीदेशा दत्ताः, सुस्थिरं डहाररान्यं गृहीतम् । कालंजरं जित्वा कीर्त्तिः स्थापिता, धनमर्जयित्वा धर्मार्थमर्जि[र्पि]तम् ॥ २९ ॥ इत्यलिल्लहनामकच्छंदः ॥ अडिल्लहेति, अरिहल्लहेति क्वचित्पाठः ॥ (G).

१२९ । लघुगुरोरेको नियमो नास्ति यत्र, पदे पदे लिख्यतामुत्तमरेखा । सुकविफणीन्द्रस्य कण्ठवलयं षोडशमात्रं पादाकुलकम् ॥ (C).

१२९ । अथ पादाकुलकं वृत्तं लक्षयति लहु गुरु एक्क णि[अ]-

---

१२९ । १ Transposed in (F). २ Non est (B). ३ णिम्म (A, B, C & D), णेम्म (E), णियम (F). ४ जाहा (B & C). ५ लेहउ (A), लेक्खइ (B & C), लेक्खउ (D), लेक्खिए (E). ६ उत्तिम (A). ७ कण्ठा (B & C), कंठ (F). ८ सोरह (D). ९ मत्ता (A). १० कुलचं (B, C & D), पादाकुलकं (E), पादाउलचं (F). ११ २६ (A), ३० (F).

CC-0. In Public Domain. Funding by IKS-MoE

जहा, सेर एक्क[१] जइ[२] पावउ[३] घित्ता
मंडा बीस पकावउ[४] णित्ता ।
टंकु[५] एक्क[६] जउ[७] सेंधव[८] पाआ[९]
जो[१०] हउ[११] रंको[१२] सो हउ[१३] राआ ॥ १३०[१४] ॥

पादाकुलकम्[१५] ।

---

सेति । जेहा — यत्र, लहु गुरु एक्क णि[मे]म — लघु गुर्वैक-नियमः णहि — नास्ति, यत्र षोडशापि मात्रा अष्टगुरुरूपेणैव पतंति, अथवा षोडशलघुरूपेणैव पतंतीति नियमो नास्तीत्यर्थः, किंतु पअ पअ — पादे पादे प्रतिचरणमिति यावत् उत्तम रेहा — उत्तमा रेखा मात्रा लघुगुर्वंतरिता इति भावः लेक्खिए — लिख्यंते स्थाप्यंते इत्यर्थः। सुकविफणींद्रकंठवलय[मि]ति पिंगल-कंठाभरणतुल्यमित्यर्थः, कंठाभरणं यथा सस्नेहं कंठे स्थाप्यते, तथे-दमपि सस्नेहं पिंगलेन कंठे धृतमित्यर्थः, सोलहमत्तं — षोडश-मात्राकं, प्रतिचरणं षोडश मात्रा यस्मिंस्तत्तादृशमित्यर्थः, पादा-कुलअं — पादाकुलकनामकं वृत्तं भवतीति शेषः ॥ पादे मात्राः

---

१३०। १ एक्कु (D). २ जउ (D), जौ (E). ३ पावउ (A & D), पावहि (B), पावइ (F). ४ पकावउँ (A), पकाविल (B), पचावउ (F). ५ टंक (A, B & C). ६ एक्कु (F). ७ ज (B), जइ (C, E & F). ८ सिन्धव (B & C), सेंधउ (E). ९ पावा (A). १० सो (A). ११ हउं (A), हुँ (D). १२ रंक (A & E), रंकु (D & F). १३ सोइ हउ (A, E & F), सो उह (D). १४ १० (A), ११ (F). १५ पाधाकुलकम् (B & C).

Digitized by eGangotri and Sarayu Trust.



लिख्यंते इत्युक्तं, तत्र कियंत्यो मात्रा इत्यपेक्षायां षोड़शमात्राकमिति हेतुगर्भं विशेषणम् । (E).

१२९ । गुरुवर्ण[गुरूणां] लघूनां वा एकोऽपि नियमो न हि यत्र पदे पदे लेखय उत्तमा रेखाः । सुकवेः फणींद्रस्य कंठवलयं षोडशमात्रं पादाकुलकं ॥ पदे मध्ये, रेखा लघवः ॥ ३० ॥ (G).

१३० । उदाहरति । सेर एको यदि प्राप्यते घृतस्य, मण्डाविंशतिः पच्यते नित्यं । टंकैकमितं यदि सैन्धवं प्राप्यते, यो भवति रङ्कः स भवति राजा ॥ मण्डा पिष्टकं, सेरटङ्कौ परिमाणविशेषौ । दीनस्येयमुक्तिः । (C).

१३० । अथ पादाकुलकमुदाहरति सेर एक्केति । सेर एक्क जौ [जउ] पावउ घित्ता — सेरकैकं यदि प्राप्नुया[द्] घृतं, मंडा बीस पकावउ णित्ता — तदा विंशतिं मंडकान् पचामि नित्यं । तत्र च जइ — यदि टंकु एक्क सेधउ पाआ — टंक एकः सैंधवः प्राप्तः, तदा जो हउ रंक सोइ हउ राआ — योऽहं रंकः स एव अहं राजा ॥ (E).

१३० । यथा ॥ सेरेति ॥ शेरैकं यदि प्राप्यते घृतं, मंडविंशतिं पचामि नित्यं । टंकैकं यदि सैंधवं प्राप्यते, योऽहं रंकः स एवाहं राजा ॥ रंकोक्तिरियम् ॥ ३१ ॥ इति पादाकुलकम् ॥ (G).

[This differs from the Pádákulakam of Pingala's Sanskrit Treatise. Vide Ghosha's compendium, pp. 22-24.—Ed.]

29

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**अथ चउबोला छंदः ।** (D). Non est (B & C).

सोलह[1] मत्तह[2] बेबि[3] पमाणह[4]
बीअ चउत्थह[5] चारिदहा ।
मत्तह[6] सट्ठि समग्गल जाणह[7]
चारि पआ[8] चउबोल[9] कहा ॥ १३१[10] ॥

---

१३१। चौ[चउ]बोलां लक्षयति सोलह मत्तेति। सोलह मत्तह—षोडशमात्राभिः बेबि—द्वावपि द्वितीयचतुर्थयोरग्रे उपादानात्प्रथमतृतीयावित्यर्थः चरणाविति शेषः [पमाणह—] प्रमाणयत, बीअ चउत्थह — द्वितीयचतुर्थयोश्चरणयोः चारिदहा — चतुर्दश मात्रा इति शेषः प्रमाणयतेति पूर्वेणान्वयः, मत्तह सट्ठि — षष्टिर्मात्राः समग्गल जाणह — समग्राः जानीत, चारि पआ — चतुष्पादं चौ[चउ]बोल कहा — चौबोलं कथय ॥ तत्र प्रथमचरणे षोडश, द्वितीये चतुर्दश, तृतीयेऽपि षोडश, चतुर्थे च चतुर्दश मात्राः पतंति, ततः चौबोलानामकं वृत्तमिति फलितार्थः । (E).

१३१। षोडश मात्रा द्वयोः पादयोः [प्र]माणय ॥ द्वितीय[चतुर्थ]योः स्थानयोश्चतुर्दश ॥ मात्राणां षष्टिः समग्रा जानीत चतुर्षु पदेषु चौबोलं कथय ॥ द्वयोः प्रथमतृतीययोः षोड़श, द्वितीयचतुर्थयोश्चतुर्दशेत्यर्थः ॥ तच्चौबोलं नाम छंदः ॥ (G).

---

१३१। १ सोरहँ (D), सोलह (E). २ मत्तहँ (D). ३ वेब (A), वेपब (F). ४ पमाणुङ (D). ५ इउठह (A), चउट्ठहँ (D), चउठाइ (F). ६ मत्तहउ (D), मत्ता (F). ७ जाण (A), जाणऊँ (D). ८ चारी पअ (E). ९ चौबोल (E & F). १० ३१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, रे धणि मत्त मअंगज[1] गामिणि
खंजण[2]लोअणि[3] चंदमुही[4] ।
चंचल जुव्वण[5] जात[6] ण जाणहि[7]
छइल्ल[8] समप्पहि[9] काइ णही[10] ॥ १३२[11] ॥
चउबोला[12] ।

---

१३२ । अथ चौबोलामुदाहरति रे धणीति । रे धणि — धन्ये, मत्त मअंगज गामिणि — मत्तमतंगजगमने खंजनलोचने चंद्रमुखि चंचलं गच्छद्यौवनं ण जाणहि — न जा[ना]सि, अतः तत् छइल्लेभ्यः विदग्धेभ्यः काइ णही — कुतो न समप्पहि — समर्पयसि । अथवा यतः चंचलम् अतएव गच्छद्यौवनं छइल्लेभ्यो न समर्पयसि, अतः त्वं काइ णही — किमपि न जानासि, यदि तु समर्पयसि तदा अभिज्ञा भवसीति भावः ॥ (E).

१३२ । यथा रे इति ॥ हे वनिते मत्तमतंगजगामिनि खंजनलोचने चंद्रमुखि ॥ चंचलं यौवनं याति न जानीहि चतुरे समर्पयसि कायं किं वा न हि ॥ ३२ ॥ इति चौ[बो]ला छंदः ॥ (G).

---

१३२ । १ मतंगज (D), मअंगच (F). २ षंजण (A), खंजअ (F). ३ लोअण (A). ४ चंमुही (E). ५ जोव्वण (E). ६ जातं (E). ७ जाणह (A), थाणहिँ (D), हि (E). ८ छइल्ल (A), छइ (E). ९ समप्पऊ (A), समप्पहिँ (D). १० काँइँ (A), काइँ षहीँ (D), काइ णाही (E). ११ ३२ (F). १२ चौवोला (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ रड्डा छंदः । (D).

पढम बिरमइ[1] मत्त दह[2] पंच, पत्र बीत्र[3] बारह ठवहु[4],
तीत्र ठाँइ दहपंच जाणहु[5], चारिम एग्गारहहि[6],
पंचमे हि[7] दहपंच आणहु[8] ।
अट्ठा[9]सट्ठी[10] पूरवहु[11] अग्गे दोहा देहु[12] ।
रात्रसेण[13] सुपसिद्ध[14] इत्र[15] रड्ड[16] भणिज्जइ[17] एहु[18] ॥
१३३[19] ॥ [राजसेना]

---

१३३ । अथ नवपदप्रकरणम् ॥ प्रथमविरतिं मात्रा[सु] पञ्चदशसु, द्वितीये द्वादशसु स्थापय, तृतीये स्थाने पञ्चदशसु जानीहि, चतुर्थे चैकादशसु, पञ्चमे पञ्चदशसु आनय। अष्टषष्टिं पूरयाग्रे दोहां देहि। राजसेनं सुप्रसिद्धं रतं भण्यते तत् ॥ अत्र चोक्तलक्षणैः पञ्चभिः पदैः अष्टषष्टिर्मात्रा भवन्ति, अग्रे च दोहापादचतुष्टयेन मिलित्वा नवपदी ॥ नवपदच्छन्दसः सप्त भेदा भवन्ति, तत्रेदं राजसेननामकं रतमित्युच्यते । (C).

१३३ । अथ रड्डां[रंडां] लक्षयति पढमेति । भो शिष्याः पढम—

---

१३३ । १ विरइ (A), विरइत्र (D). २ दह (E). ३ वीद (C). ४ ठवउ (E). ५ जाणु (B), जाणह (C). ६ इग्गारहि (A), इग्गारहहिँ (B & C), एग्गारहिँ (D). ७ उ (A & E), च (C). ८ जाणउ (A & C), जाणउ (B). ९ एस चट्ठ (F). १० सट्टा (B & C), सट्ठा (D), सट्ठि (F). ११ संठवउ (A), पुरह (F). १२ देउ (F). १३ रात्रसेइ (B), रात्रसेणि (A), राजसेण (F). १४ सपसिद्ध (E). १५ चह (A, B & C). १६ रत्तं (C), रड्डउ (D), रंड (F). १७ भणिज्जअ (B & C). १८ एह (C). १९ २८ (A), ३४ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



प्रथमचरण इत्यर्थः दहपंच मत्त—पंचदशसु मात्रासु विरमइ—विरमति विरामं समाप्तिं प्राप्नोतीत्यर्थः, प्रथमचरणे पंचदश मात्राः कर्त्तव्या इति भावः। बीअ—द्वितीये पअ—पदे बारह—द्वादश मात्रा इति शेषः, सर्वत्र यथा यथा योजनीयः, ठवहु—स्थापयत। तीअ ठाइ—तृतीये स्थाने तृतीयचरणे इत्यर्थः दह-पंच मात्राः जाणहु—जानीत। चारिम—चतुर्थे चरणे इति शेषः, इदं च यथापेक्षमन्यत्रापि योज्यं, एग्गारहहि—एकादश मात्राः जानीतेति पूर्वेणान्वयः। पंचमे उ—पंचमेऽपि चरणे दहपंच—पंचदश मात्राः आणहु—आनयत। एवंप्रकारेण अट्ठासट्ठी—अष्ट-षष्टिर्मात्राः पूरवहु—पूरयत, अग्गे अष्टषष्टिमात्रांते दोहा—द्विपदिकां तेरह मत्तेत्यादिना पूर्वमुक्तां देहु—ददत। एहु—एषा रड्डा, [इअ—] इयं सुपसिद्ध—सुप्रसिद्धं यथा स्यात्तथा राअ-सेण—राजसेना इत्यपि भणिज्जइ—भण्यते॥ एतस्या राजसेना इति नामांतरमपि कथ्यत इत्यर्थः। (E).

१३३। अथ रंडामाह॥ पढमेति॥ प्रथमा विरतिर्मात्रासु दशपंचसु, पादे द्वितीये द्वादशसु स्थापय, तृतीयस्थाने दशपंचसु जानीहि, चतुर्थ एकादशसु, पंचमे दशपंच मानय। एवमष्टषष्टिं पूरय, अग्रे दोहां देहि॥ राजसेनसुप्रसिद्धिता रंडा भण्यते एषा॥ प्रथमतृतीयपंचमे पादे पंचदश मात्रा द्वितीये द्वादश चतुर्थे एकादशेति द्वा[अष्ट]षष्टिर्मात्रा भवंति, तदुपरि दोहा देयेति॥ राजसेनो राजसेनप्रसिद्धिं प्रापित इति केचित्, राजसेनेति नामां-तरप्रसिद्धिं प्रापितेत्यन्ये॥ सा रंडेति भण्यते॥ ३४॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



बिसम तिकल[1] संठबहु तिण्णि पाइक्क[2] करहु[3] लहु[4]
अंत[5] णरेंद[6] कि बिप्प पढम[7] बेमत्त अबर[8] पइ[9] ।
सम पअ तिअ पाइक्क सब्बलहु[10] अंत बिसज्जहु[11]
चउठा चरण[12] बिआरि[13] एक्क लहु कड्ढिअ लिज्जहु ॥
इम[14] पंच पाअ[15] उट्टबण[16] कइ
बत्थु[17] णाम पिंगल[18] कहइ[19] ।
ठवि दोसहीण[20] दोहाचरण
राअसेण[21] रड्डु[22] भणइ ॥ १३४[23] ॥ छप्पअ ।

---

१३४ । तत्र गणव्यवस्थामाह । विषमे त्रिकलं संस्थापय, त्रीन् पदातिकान् कुरु नीत्वा प्रथमे नरेन्द्रः किं विप्रोऽन्ते द्विमात्रोऽपरपदे । समे पदे त्रयः पदातिकाः सर्व्वलघुरन्ते विसृज्यतां, चतुर्थचरणे विचार्य्य एकलघुर्दृष्टा नीयताम् ॥ एवं पञ्चपदोत्थापनं वस्तुनाम पिङ्गलः कथयति । स्थापयित्वा दोषहीनान् दोहाचरणान् राजसेननामा रण्डा भण्यते ॥ विषमे प्रथमे तृतीये पञ्चमे पादे

---

१३४ । १ तिकल्ल (B). २ पाइक्क (D). ३ Non est (F). ४ तस्थ (E). ५ अंत and पढम transposed in (E). ६ णरिंदु (D), णरेंदु (E & F). ७ पढमे (B & C). ८ अवर (B & C). ९ पअ (B, C & E), मइ (F). १० बज्झ (F). ११ विज्जइ (B), विसलज्झ (D), बिसज्झ (E). १२ चउ चरण (C & F), चौत्था चरण (E). १३ अपि (A), विचारिअ (C). १४ एम (A, B, C, D & F), ए short. Vide श्लोक ५, p. 7. १५ पाए (D). १६ उदथाणु (D), उट्टवण (F). १७ वच्छु (A), वखु (B). १८ पिंगलु (D & F). १९ कुणइ (A, B, C & D), कहव (E). २० दोसहिण (B). २१ राअसेण (B). २२ रड्डइ (B), रड्डइ (C), रड्डहँ (D), रड्डउ (E), रड्डुज्झ (F). २२ १९ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



एकस्त्रिकलस्त्रयः पदातिकाश्चतुष्कलगणाः कार्य्याः, नीत्वा ज्ञात्वा, प्रथमपादे तु नरेन्द्रः किंवा विप्रश्चरमगणः। नरेन्द्रो जगणः, विप्रश्चतुर्लघुः। अपरपदे तृतीये पञ्चमे चान्ते द्विमात्रो द्विलघुस्तेन चरमो यः चतुष्कलस्तृतीयपञ्चमयोरुक्तः स भगण इति वदन्ति। समपादे द्वितीये चतुर्थे च त्रयश्चतुष्कलाः, तत्रान्तिमः सर्व्वलघुश्चतुर्थचरणस्यैकादशमात्रत्वात् चतुष्कलगणत्रयं [न] सम्भवत्येव, अतोऽन्तिमगणे लघुरेको विकर्षणीयः। वस्त्वित्यपि एतस्य छन्दसो नाम। नाम प्राकाश्ये। (C).

१३४। अथ रंडायां तावत्तावन्मात्रा तत्तच्चरणे देया इत्युक्तं, तत्र विप्रा[न्या]सप्रकारमाह विसमेति। विसम — विषमे पादे प्रथमे तृतीये पंचमे चेत्यर्थः, आदौ तिकल संठबक्ष — त्रिकलं स्थापय, ततश्च त्रिकलानंतरमित्यर्थः तिण्णि पाइक्क — त्रीन् पदातीन् चतुष्कलानित्यर्थः करक्क — कुरुत, पढम — प्रथमे पादे अंत — अंते प्रथमपादांते इत्यर्थः णरिंद कि विप्प — नरेंद्रं मध्यगुरुं जगणं किंवा विप्रं चतुर्लघ्वात्मकं गणं कुरुतेति पूर्वेणान्वयः, तथाच प्रथमे चरणे त्रिकलानंतरं कर्त्तव्येषु त्रिषु चतुष्कलेषु तृतीयश्चतुष्कलो जगणस्वरूपो विप्ररूपो वांते कर्त्तव्यः न तु पृथगिति हृदयं। अवर पअ — अपरपादे विषमचरणगणविचारस्यैव प्रक्रांतत्वात्प्रथमादपरस्मिन् विषमे तृतीये पंचमे च पादे इत्यर्थः बे मत्त — द्वे मात्रे द्वौ लघू इत्यर्थः, उदाहरणानुरोधादत्र मात्राशब्दो लघुवाची, अंते देये इत्यर्थः, तथाच तृतीयपंचमकानंतरदेयेषु चतुष्कलेषु तृतीयो गणः भगणो देय इति भावः तस्यैव द्विलघ्वंतत्वात्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



अथ विषमचरणव्यवस्थां विधाय समचरणव्यवस्थामाह सम पअ इति ।। सम पअ—समे पादे द्वितीये चतुर्थे चेत्यर्थः आदौ विअ पाइक्क—द्वौ पदाती चतुष्कलावित्यर्थः, अंत—अंते चतुष्कलद्वयांते पादांते चेत्यर्थः सब्बलहु—सर्वलघु विसज्जइ—विसृजत, चौ[चउ]त्था चरण—चतुर्थचरणे अंते इति पूर्वतनमनुषंजनीयं, विचार्य सावधानतया एक्कलहु—एकं लघुं कड्ढिअ लिज्ज—निष्कास्य गृह्यतां द्वितीयचरणांतिमगणापेक्षया चतुर्थचरणांतिमगणे एको लघुर्न्यूनः कर्त्तव्यः, तत्र एका मात्रा न देयेति हृदयं ॥ तथाच समे पदे चतुष्कलद्वयांते सर्वलघ्वात्मकगणदानमुक्तं, तत्र चतुर्थचरणे चतुष्कलद्वयानंतरं सर्वलघुः त्रिकलो देयः, द्वितीये च सर्वलघुश्चतुष्कलो देय इति व्यवस्था ।

इम पंच पाअ उट्टवण कइ—एवं पंचपादोट्टवनं कृत्वा, उट्टवनं विन्यासः, तथाच एवं पंचपादविन्यासं कृत्वेत्यर्थः, दोसहीण दोहाचरण—दोषहीनदोहाचरणान् जस्सेत्यादिना [Vide श्लोक ८४, p. 145.—Ed.] पूर्वोक्तप्रथमतृतीयजगणवत्त्वरूपदोषरहितान् दोहाचतुश्चरणानित्यर्थः, ठवि—स्थापयित्वा पूर्वोक्तचरणपंचकानंतरं दोहां दत्त्वेत्यर्थः, पिंगलः बत्थुणाम—वस्तुनामकं वृत्तं कहेइ—कथयति, एतदेव राअसेण रड्डउ—राजसेनरडा च एतस्यैव राजसेना रंडेति च नामांतरं भणइ—भणति ॥ (E).

१३४ । अस्योट्टवनिकामाह ॥ विसमेति ॥ विषमेषु त्रिक[लः] संस्थाप्यतां, त्रयः पदातयस्ततः, अंते नरेंद्रः किं विप्रः, प्रथमे द्वे मात्रे, अवर—मध्ये ॥ विषमेषु प्रथमतृतीयपंचमेषु चरणेषु, पदातिश्चतु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

भमइ महुअर[1] फुल्ल[2] अरविंद[3], णवकेसु[4] काणण जुलिअ[5],
सव्वदेस पिकराव[6] चुल्लिअ, सिअल पवण लहु वहइ,
मलअ कुहर णव[7] बल्लि[8] पेल्लिअ।
चित्त[9] मणोभव सर[10] हणइ दूर दिगंतर[11] कंत।
किम[12] परि अप्पउ बारि[13]हउ एम[14] परि पलिअ[15] दुरंत॥

१३५[16] ॥ राजसेना।

---

ष्कलः॥ तत्र प्रथमे पादे द्वौ [?] इति तृतीये न कार्य इत्यर्थः, एवं च द्वितीये द्वादश चतुर्थे एकादश मात्रेति निष्कर्षः॥ तृतीयचतुष्कलस्थाने जगणश्चतुर्लघुर्वा देयः॥ अवरयोस्तृतीयपंचमयोरंते लघुद्वयं देयमित्यर्थः॥ समयोः पादयोः द्वौ पदाती सर्वत्र लघुमंते विसर्ज्जय॥ चतुर्थचरणो विचार्य एकं लघुमाकृष्य क्रियतां॥ एवं पंचपादोद्भवनं कृत्वा वस्तुनाम पिंगलः कथयति, स्थापयित्वा दोषहीनं दोहाचरणं राजसेनरंडामिति भणति॥ (G).

---

१२५। १ मऊकर (F). २ फुल्लु (A), पल्लो (F). ३ अरइंद (D). ४ णवकिसु (F). ५ फुलिअ (D), पुल्लिअ (F). ६ पिकराअ (A), पिकरवे (B & C), पिअ राव (D), पिक राग (F). ७ मऊलअ कुहर वण (C). ८ वल्लिअ (D). ९ चेउ (B & C). १० सरे (B). ११ दिगंत (F). Three letters dropt after त in (C). १२ केम (A), के (B & C). १३ धारि (C), वादिरि (E). १४ पा एव (C), ए short. Vide श्लोक ५, p. 7. १५ पलि (A), पलिइ (C), मल्लि (F). १६ २० (A), २६ (F).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१३५। उदाहरति। भ्रमति मधुकरः फुल्लमरविन्दं, नवकिंशुककाननं स्फुटितं, सर्व्वदेशः पिकरावेण घूर्णितः, शीतलपवनो लघु वहति, मलयकुहरवनवल्लीः प्रेरयति। चित्तं मनोभवशरो हन्ति, दूरदिगन्तरे कार्य्यः[न्तः]। किमुपर्य्यात्मानम् उद्धरिष्यामि, अयं पतितो दुरन्तः॥ किमुपरि किमु[पा]लम्बेन उद्धारयिष्यामि जीविष्यामीति यावत्, दुरन्तः समय इति यावत्। विरहिण्याः उक्तिरियम्। (C).

१३५। रड्डामुदाहरति भमईति। मऊअर—मधुकराः भमइ—भ्रमंति, फुल्ल अरबिंद—पुष्पितान्यरविंदानि, काणण—काननानि [णवकेसु—] नवकिंशुकैः जुलिअ—ज्वलितानीव भांती[ति] शेषः, सव्वदेस—सर्वदेशः पिकराव चुल्लिअ—पिकरावैस्तुलुकितः निमीतइति यावत्, कोकिलालापानाकर्ण्य संजातकंदर्पबाधया सर्वोऽपि देशि[शो] निःपीत इव भातीति भावः, मलअ कुहर णव वल्लि पेल्लिअ—मलयकुहरनववल्लीः प्रेषयित्वा ताः कंपयित्वेत्यर्थः, सिअल अवण—शीतलः पवनः लऊ—लघु मंदं यथा स्यात्तथा बहइ—वहति। चित्त मणोभव सर हणइ—चित्तं मनोभवः शरैर्हंति, कंत—कांतः दूरे दिगन्तरे एव, दुरंतः दुष्टः अंतो यस्य [स] तादृशः समय इति शेषः परिपलिअ—परिपतितः, अप्पउ—आत्मानं किम परि—कया परिपाट्या रक्खारिहंउ—रक्षिष्यामि॥ (E).

१३५। यथा॥ भमेति॥ भ्रमंति मधुकराः, फुल्लान्यरविंदानि, नवं किंशुककाननं पुष्पितं, सर्वदेशे पिको रागं वंदते, शीतलः पवनो लघु वहति, मलयकुहरनववल्लीः प्रेषयित्वा। चित्तं मनोभव-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



करही णंदा मोहिणी[1] चारुसेणि[2] तह भद्द ।

राअसेण तालंक[3] पिअ[4] सत्त बत्थु[5] णिप्पंद[6] ॥ १३६[7] ॥

दोहा ।

---

घरो हंति, दूरं दिगंतरे कांतः । केन प्रकारेणात्मा वारणीयः एवं दुरंतः एवं प्रकारेण दुरंतः ॥ ३६ ॥ (G).

१३६ । करभी नन्दा मोहिनी चारुसेनी तथा भद्रः । राजसेनः ताड़ङ्कः प्रियाणि सप्त वस्तूनि निष्पन्नानि ॥ कवीनां प्रियाणि । (C).

१३६ । अथैतस्यैव भेदानां ससंख्यं नामान्याह करहीति । पिअ — हे प्रिये करभी नंदा मोहिनी चारुसेना तथा भद्रः । राजसेनः तालंकिनी इति सत्त — सप्त बत्थु णिप्फंद — वस्तुनिस्पंदाः वस्तु-नामकस्य पूर्वोक्तवृत्तस्य निस्पंदा भेदा इत्यर्थः ॥ रड्डाया एव वस्तु राजसेन इति च नामांतरम् । (E).

१३६ । दोहांतस्य रंडेति जातिनाम्नो वृत्तस्य भेदानाह ॥ करहीति ॥ करभी १, नंदा २, मोहिनी ३, चारुसेना ४, तथा भद्रा ५ । राजसेना ६, तालंकिनी [७] प्रिये सप्त वस्तुभेदाः ॥ प्रिये इति संबुद्धिः ॥ ३७ ॥ (G).

---

१३६ । १ मोहणी (A & F). २ चारुसेणी (A, B & C), चारुसेण (E). ३ तालंकु (E). ४ किअ (A). ५ वत्थु (A). ६ णिप्फन्न (B), णिप्पन्न (C), णिप्फुंद (D), णिप्पूल (E). ७ २१ (A), २० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**पढम तीअ[1] पंचम पअह तेरह मत्ता जासु ।**
**बीअ चउत्थ[2] एगारहिं[3] करहिं[4] भणिज्जइ[5] तासु ॥ १३७[6] ॥**
**दोहा ॥ [इति] करही[7] । (C).**

१३७ । प्रथमतृतीयपञ्चमपादेषु त्रयोदश मात्रा यस्यां । द्वितीय-चतुर्थयोरेकादश करभी भण्यते सा ॥ अत्र चान्ते दोहा सर्व्वैव बोध्या, पादपञ्चक एव विशेषः क्रियते, तत्र च त्रिकल-चतुष्कल-द्वय-द्विकलगणाः कार्य्याः, समे चतुष्कलद्वयं त्रिलघु चेत्येवमन्यत्रापि विचार्य्य व्यवस्थेयम् । (C).

१३७ । तेषु प्रथमं करभीं लक्षयति पढमेति । जासु — यस्याः प्रथमतृतीयपंचमपादेषु तेरह मत्ता — त्रयोदश मात्राः । बीअ चउत्थ — द्वितीयचतुर्थयोश्चरणयोरिति शेषः, एआरहहि — एकादशैव मात्रा भवंतीत्यर्थः, तासु — तस्याः करहि — करभीति नामेति शेषः भणिज्जइ — भण्यते ॥ अयमभिप्रायः, पूर्ववस्तुच्छंदसि प्रथमे चरणे पंचदशमात्राः द्वितीये द्वादश तृतीये पंचदश चतुर्थे एकादश पंचमे पंचदश देया इति फलितं, तत्रैव प्रथमतृतीयपंच-मचरणेषु प्रथमोपात्तत्रिकले मात्राद्वयं दूरीकृत्य द्वितीयचरणे चांतोपात्तसर्वलघुचतुर्मात्रिके एकां मात्रां दूरीकृत्य चतुर्थं च पूर्व[व]देव संस्थाप्याग्रे दोहां दत्त्वा करभी वाच्या, न तु [?] विषम-पादेषु प्रथमोपात्तत्रिकले मात्राद्वयं न्यूनं कर्त्तव्यम् । अंतोपात्त-

१३७ । १ तीमध (C), तीए (D). २ चउक्क (A). ३ एआरहि (A), दुआर-हहि (B & C), एआरहिँ (D), एगारहहि (E). ४ करइ (F). ५ भणिज्जउ (B & C), भणिज्जउ (F). ६ ३१ (A), ३८ (F). ७ करहि (B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढम तीअ पंचम पअह मत्त होइ[1] दहचारि ।
बीअ[2] चउत्थ[3] एगारहि[4] णंद भणिज्ज[5] विआरि ॥ १३८[6] ॥
दोहा । [इति] णंद । (A, B & C).

---

जगणभगणेषु चेत्यत्र किं विनिगमकमिति चेत्, सत्यं, सामान्यानालिं[गि]तविशेषाभावात् पूर्वोक्तं रड्डानियमानामुत्तरत्राप्यावश्यकतया करभ्यामपि प्रथमचरणांते जगणविप्रान्यतरस्य, तृतीयपंचमयोश्च भगणस्यावश्यं स्थापनीयत्वात्प्रथमपरित्यागे मानाभावाच्च प्रथमोपात्तत्रिकलमध्यत एव मात्राद्वयं न्यूनं विधेयं, द्वितीये च समचरणे अंते सर्वलघुर्देय इति नियमस्य पूर्वमुक्तत्वात् अंते सर्वलघुस्थापनमावश्यकमिति चतुर्थचरणसाम्यतया द्वितीयचरणस्थापने बाधकाभावादंतिमसर्वलघ्वात्मकगणमध्यत एव ह[ए]का मात्रा न्यूना विधेयेति न कश्चिद्दोष इत्यस्मत्तातचरणोपदिष्टः पंथाः सुधीभिर्विभावनीयः । यत्तु विषम आद्युपात्तत्रिकलमध्ये मात्राद्वयं न त्याज्यमेककलगणाभावादिति, तन्न आर्यायामुत्तरार्द्धे षष्ठस्यैवात्रापि प्रथमस्यैककलस्य स्थापने बाधकाभावात् । (E).

१३७ । पढमेति ॥ प्रथमतृतीयपंचमे पादे त्रयोदश मात्रा यस्य । द्वितीयचतुर्थयोरेकादश करभी भण्यते सा ॥ अंते दोहा देयेति सर्वत्र शेषः ॥ ३८ ॥ (G).

---

१३८ । १ हो (A). २ विअ (A). ३ चउच्छ (A), चतुत्थ (F). ४ एआरहई (A), इआरहहि (B), इआरहइ (C), एआरहहिँ (D), एआरहहि (E). ५ मुणिज्ज (A & C), मुणिज्जसु (B). ६ ३३ (A), ३९ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढम तीअ पंचम पअह णबदह मत्ता जासु ।
बीअ[1] चउत्थ[2] एगारहि[3] तं[4] मोहिणि सुणि[5] आसु ॥ १३९[6] ॥
दोहा । [इति] मोहिणी । (B & C).

१३८ । विषमे मात्रा भवन्ति चतुर्दश । समे एकादश नन्दा भण्यते विचार्य्य ॥ (C).

१३८ । अथ नंदां लक्षयति पढमेति । यत्र प्रथमतृतीयपंचमपादेषु दहचारि—चतुर्दश मत्त होइ—मात्रा भवंति । बीअ चउत्थ एआरहहि—द्वितीयचतुर्थयोरेकादशैव मात्रा भवंतीति पूर्वतनानुषंगः, तं बिआरि—विचार्य णंदं भणिज्ज—नंदां भण ॥ अत्रापि पूर्वोक्तरीत्या विषमपादेषु प्रथमोपात्तत्रिकलमध्यत एव एकां मात्रां दूरीकृत्य द्वितीयपादे चांतस्थचतुर्लघ्वात्मकगणमध्यत एकां मात्रां त्यक्त्वा चतुर्थं पूर्ववदेव स्थापयित्वाग्रे दोहां दत्त्वा नंदा वाच्या इति निष्कर्षः । (E).

१३८ । पढेति ॥ चतुर्दशमात्राभिर्नंदेति । शेषं पूर्ववत् । एवमग्रेऽपि ॥ ३९ । (G).

१३९ । विषमे नवदश मात्रा यस्यां । समे एकादश सा मोहिनी ज्ञायतामियम् ॥ (C).

१३९ । अथ मोहिनीं लक्षयति पढमेति । यस्यां प्रथमतृतीयपंचमपादेषु णवदह मत्ता—एकोनविंशतिर्मात्राः । बीअ चउत्थ

१३९ । १ बीए (D). २ चउक्क (A), चतुत्थ (F). ३ एआरहइ (A), इआरहि (B), एआरहहिँ (D), एआरहहि (E). ४ दं (A). ५ सुणि (A), भणि (E). ६ ३४ (A), ४० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढम तीअ पंचम पअह मत्त[1] पसारह[2] जासु ।
बीअ चउत्थ[3] एआरहि[4] चारुसेणि[5] मुणि आसु[6] ॥ १४०[7] ॥
दोहा । [इति] चारुसेणी । (B & C).

एआरहहि—द्वितीयचतुर्थयोरेकादशैव मात्रा भवंति, तं—तां आसु—एनां मोहिणी [—मोहिनीं] सुणि—जानीहि ॥ अत्र विषमेषु त्रिकलानंतरं चत्वारश्चतुर्मात्रिका विधेयास्तेष्वेव प्रथम-पादांते जगणो विप्रो वा विधेयस्तृतीयपंचमयोश्चांति[म]भगण एव विधेयो द्वितीये चांतिममध्यत एव एकां मात्रां निष्कास्य चतुर्थं च पूर्ववदेव संस्थाप्याग्रे दोहां दत्त्वा मोहिनी वाच्येति व्यवस्था । (E).

१३९ । पढेति ॥ एकोनविंशतिस्तां मोहिनीं जानीत ॥ ४० ॥ (G).

१४० । विषमे मात्राः पञ्चदश यस्यां । समे एकादश चारुसेनी ज्ञायतामियम् ॥ (C).

१४० । अथ चारुसेनां लक्षयति । जासु—यस्याः प्रथम-तृतीयपंचमपादेषु पसारह—पंचदश मत्त—मात्राः । बीअ चउत्थ —द्वितीयचतुर्थयोः पादयोः एकादशैव मात्रा भवंतीति शेषः, आसु—एनां चारुसेनां भण—कथय ॥ अत्र विषमचरणान् वस्तुन इव संस्थाप्य द्वितीयचतुर्थौ चरणौ करभ्या इव विधायाग्रे दोहां दत्त्वा चारुसेना वाच्येति निष्कर्षः । (E).

१४० । पढेति ॥ पंचदश चारुसेना ज्ञेया ॥ ४१ ॥ (G).

---

१४० । १ मत्ता (F). २ पसर (B), पण्णरह (F). ३ चउक्क (A). ४ एआ-रहहि (A, D & E), इआरहहि (B & C). ५ चारुसेणी (B), चारुसेण (D & E). ६ भणु तासु (A). ७ ३५ (A), ४१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढम तीअ पंचम पअह मत्ता दहपंचाइँ ।
बीअ चउत्था[1] बारहहि[2] भद्द णाम कहि आइँ ॥ १४१[3] ॥
दोहा । [इति] भद्द । (B & C).

पढम तीअ पंचम पअह मत्त पणरह[1] जासु[2] ।
सम बारह अरु[3] एक्कदह राअसेण[4] भण[5] तासु[6] ॥ १४२[7] ॥
दोहा । [इति] राअसेण । (B & C).

१४१ । विषमे मात्राः पञ्चदश । समे द्वादश भद्रनाम उच्यते भण्यते वा ॥ (C).

१४१ । अथ भद्रं लक्षयति पढमेति । प्रथमतृतीयपंचमपादेषु मात्राः पंचदश, द्वितीयचतुर्थयोर्द्वादश मात्राः भवंति, आइं — एतस्य भद्देति नाम कथितम् ॥ अत्र चतुर्थे त्रयस्त्रतुर्मात्रिका अन्ये वस्तुनद्रवेति निष्कर्षः । (E).

१४१ । पढेति ॥ द्वितीयचतुर्थयोर्द्वादश, भद्रा नाम कथ्यते ॥ ४२ ॥ (G).

१४२ । विषमे मात्राः पञ्चदश । द्वितीये द्वादश, चतुर्थे एकादश, राजसेनो भण्यताम् ॥ (C).

१४२ । अथ पूर्वं विसम तिकलेत्यनेन [Vide श्लोक १२४ p. 230.] लक्षितमपि राजसेनापरनामकं वस्तु वृत्तं करही नंदेत्यत्र तदन्य-

१४१ । १ चउतके (A). २ बारहह (A), बारह (B & C). ३ ३९ (A), ४२ (F).

१४२ । १ पन्नर (B), पणरह (F). २ जच्छ (A), जत्व (D). ३ अरव (A). ४ राजसेण (E). ५ भणु (B, C & D). ६ तच्छ (A), तत्थ (D). ७ ३० (A), ४३ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**पढम तीअ पंचम पअह मत्ता सोलह जासु ।**
**सम बारह अरु[1] एक्कदह तालंकिणि भणु[2] तासु ॥ १४३[3] ॥**
**दोहा । [इति] तालंकिनी[4] । (A).**
**इति रड्डाप्रकरणम्[5] । (A, B & C).**

---

एत्र राजसेनः कथित इति भ्रमनिरासार्थं पुनस्तमेव लक्षयति पढमेति । प्रथमतृतीयपंचमपादेषु मात्राः पंचदश यत्र । समे चरणे द्वादश अरु—अथच एक्कदह—एकादश राजसेनं भणत च ॥ एतन्निष्कर्षस्तु पूर्वमेव कृतः । (E).

१४२ । पढेति ॥ समे द्वादशान्यदेकादश राजसेना भण्यते सा ॥ समे प्रथमे[द्वितीये] अन्यत् चतुर्थेऽर्थः ॥ ४२ ॥ (G).

१४३ । विषमे मात्राः षोडश, द्वितीये द्वादश, चतुर्थे एकादश, ताडङ्किनी भण्यताम् ॥ (C).

१४३ । अथ ताडं[लं]किनीं लक्षयति पढमेति । यस्याः प्रथमतृतीयपंचमपादेषु सोलह—षोडश मात्रा भवंतीति शेषः । समे—द्वितीये चतुर्थे च द्वादश अथच एक्कदह—एकादश मात्रा भवंतीति शेषः, यथायथं योजनीयः । द्वितीये द्वादश मात्रा भवंतीत्यर्थः । तासु—तां ताडं[लं]किनीं भण ॥ अत्र विषमपादेषु [ज]गणांता विप्रांता वा चत्वारस्तुष्कलाः कार्य्याः, समौ च पूर्ववत्, अग्रे दोहां दत्त्वा ताडं[लं]किनि[नी] वाच्येति निष्कर्षः । * इति श्रीपिंगलप्रकाशे रंडाप्रकरणम् ॥ * (E).

१४३ । पढमेति । * * * तालंकिनी भण्यते सा ॥ ४४ ॥ (G).

---

१४३ । १ वा (A, B & C). २ भणि (B), भण (D). ३ ९८ (A), ४४ (F). ४ तालकी (B & C). ५ इति रंडा (F).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ पद्मावती छंदः । (D).

भणु[1] पउमावत्ती[2] ठाणं ठाणं
चउ[3]मत्ता गण[4] अट्ठाआ[5],
धुअ कण्णो करअल[6] विप्पो चरणो
पाए[7] पाअ उक्किट्ठाआ[8] ।
जइ पलइ[9] पओहर[10] किमइ[11] मणोहर[12]
पीडइ[13] तह णाअक्क[14]गुणो[15],
पिअरहि[16] संतासइ कइ[17] उब्बासइ
इअ[18] चंडालचरित्त गणो ॥ १४४[19] ॥

---

१४४। भण पद्मावतीं स्थाने स्थाने चतुर्मात्रा गणा अष्टौ। अत्र के गणा इत्याह, ध्रुवं कर्णः करतलं विप्रस्वरणः पादे पादे उत्कृष्टस्थाप्याः। यदि पतति पयोधरः किमयं मनोहरः पीडयति तथा नायकगुणं तथा न यो जनं प्रियवत्संस्थापयति, कविमुद्वासयति, अयं चण्डालचरितगणः॥ कर्णो द्विगुरुः SS, करतलमन्त-

---

१४४। १ भण (B & C). २ पोमावती (A), पउम्रावत्ती (B & C), पोमावत्ती (E), पोमावती (F). ३ चउ (A), चौ (E & F). ४ गणा (F). ५ अट्ठाआ (B & C), अठाआ (F). ६ करअलु (B & C). ७ पाअ (A). ८ उकिट्टाआ (B & C), उक्किट्टाआ (F). ९ पइ (A). १० पओहर (B & C). ११ किमउ (F). १२ माणोहर (A), मणोहर (C). १३ पीडउ (C). १४ णाइक्क (F). १५ गुणा (F). १६ पिअरह (A, B & C), पिअरही (E). १७ कवि (F). १८ इह (B & C). १९ २९ (A), ४५ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



गुरु ॥ऽ, विप्रः सर्व्वलघुः ।।।।, चरण आदिगुरुः ऽ।।, एते यथेच्छं स्थाप्या न तु क्रमनियमः। अत्र च जगणः सर्व्वथा न कार्य्यः। (C).

१४४। अथ पद्मावतीं लक्षयति भणु पोमावत्तीति। यत्र कण्णो—कर्णः गुरुद्वयात्मको गण इत्यर्थः, करअल—करतलं गुर्वंतः सगण इत्यर्थः, विप्पो—विप्रश्चतुर्लघुको गण इत्यर्थः, चरणः गुर्वादिर्भगण एत एवेति शेषः चउमत्ता—चतुर्मात्रिकाः अट्ठाआ—अष्टौ गणाः पाए पाअ—[पादे पादे] देयाः प्रतिचरणमित्यर्थः, ठाणं ठाणं—स्थले स्थले, उक्किट्ठाआ—उत्कृष्टाः अधिका बहुश इति यावत् पतंति। यत्र प्रतिचरणं स्थापनीया अष्टौ गणाः कर्णसगणविप्रभगणस्वरूपा एव पतंति नान्य एत एव पौर्वापर्येण पुनः पुनः वाराष्टकं पतंतीति यावदित्यर्थः, तां पोमावत्ती—पद्मावतीं भण पद्मावतीनामकं तद्वृत्तं कथयेत्यर्थः। अत्र जइ—यदि पओहर—पयोधरः मध्यगुरुर्जगण इत्यर्थः पलइ—पतति, तह—तदा किमपि मनोहरं सम्यक् न भवतीति शेषः, किंतु चंडालचरित्रः इअ—अयं जगणाख्यो गणः णाअक्कगुणो—नायकगुणं पीडयति, पिअरहि—पितरं संत्रासयति, अतएव कइ उब्बासइ—कविमुद्वासयति॥ अत्र जगणे पतिते यस्य कवित्वमेतच्छंदसा भवेत्स राजा नश्येत्, नष्टे च तस्मिन्नेतादृशकवित्वनिर्माणकर्त्रा कविनापि बंधनताडनादिव्यथा प्राप्तव्येति, अत्र जगणः सर्वथा न देय इति भावः। (E).

१४४। भणु इति। भण पद्मावतीं स्थाने स्थाने चतुर्मात्[त्रि]कं गणाष्टकं॥ मात्रा गण[य]ति॥ धुवेति॥ ध्रुवं कर्णः करतलं विप्र-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, भअ भंजिअ[१] बंगा भंगु[२] कलिंगा
तेलंगा[३] रणमुक्कि चले,
मरहट्ठा[४] धिट्ठा[५] लग्गिअ[६] कट्ठा[७]
सोरट्ठा भअ[८] पाअ पले ।
चंपारण कंपा पव्वअ[९] झंपा
ओत्था[१०] ओत्थी[११] जीव हरे[१२],
कासीसर[१३] राणा[१४] किअउ[१५] पआणा[१६]
विज्जाहर भण[१७] मंतिवरे[१८] ॥ १४५[१९] ॥ पद्मावती ।

---

स्वरणः पादे पादे उत्कृष्टः, यदि पतति पयोधरः किमपि न मनोहरं, पीडयति तथा नायकगुणं, पितरमपि संतापयति, कविमुद्वासयति इति चंडालचरित्रो गणः, जगण इत्यर्थः ॥ द्विगुरुः कर्णः, करतलं सगणः, विप्रश्चतुर्लघुश्चरणो भगणः ॥ तत्र जगणस्य दुष्टफलत्वान्न कार्य इति ॥ दशाष्टचतुर्दशसु यतिः ॥ ४५ ॥ (G).

१४५ । उदाहरति । भयभग्ना वङ्गा भग्नाः कलिङ्गाः तेलङ्गारणमत्तास्खलिताः, महाराष्ट्रा धृष्टा नग्नकोष्ठाः सौराष्ट्रा भयात्पदे

---

१४५ । १ भञ्जिअ (C & E). २ भजु (A), भङ्ग (C), भग्ग (E). ३ तेरंगा (C). ४ मरहट्टा (B & C), मरहट्ठ (E). ५ ढिट्ठा (A). ६ लगिअ (E). ७ कट्टा (B & C), कंठा (F). ८ गअ (A), पअ (B & C). ९ पव्वह (C). १० ओत्था (A), ओत्थी (D & F). ११ ओत्थी (A). १२ जीअ हरे (A & C), जीवपर (F). १३ वणसीसर (C). १४ सणा (D), राआ (F). १५ किण (A), किएउ (E). १६ पआणा (E). १७ भणु (B & C). १८ सान्तसरे (B), मंतिवरे (E). १९ ४० (A), ४६ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पदे पतिताः । चन्दनेन[?] कम्पिताः पर्व्वतसर्पा उत्थितोत्थिताः जीवितं हापितवन्तः काशीश्वरराणाः कृतोपयानाः विद्याधरोभणति मन्त्रिवरः ॥ राणाः तत्तद्देशीयाः च्चत्रियाः पराजिताः पर्व्वते कृतः सर्पो यैः ते तथा कृतोपयानाः कृतपलायनाः । कस्यचिद्राज्ञः स्तुतिरियम् । (C).

१४५। अथ पद्मावतीमुदाहरति भञ्ज भञ्जिञ्ज इति। यदा कासीसर राणा—काशीश्वरेण दिवोदासेन राज्ञा, पञ्चाणा—प्रयाणं किएउ—कृतं, तदा बंगा—वंगदेशीया राजानः भञ्ज भञ्जिञ्ज—भयेन भग्नाः कृताः, भग्ग कलिंगा—पलायिताः कलिंगाः, तेलंगा रण मुक्कि चले—तैलंगाः रणं मुक्ता चलिताः, धिट्ठा—धृष्टा रणनिर्भीका इत्यर्थः मरहट्ठ—महाराष्ट्राः कट्ठा—काष्ठासु दिक्षु लगिञ्ज—लग्नाः पलाय्य दिगंतं गता इत्यर्थः, सौराष्ट्रा भयेन पादपतिताः, पब्बञ्ज झंपा—पर्वतझंपाः कंपा—कंपाः कंपनशीला इत्यर्थः चंपारणाः ञोत्था ञोत्थी—उत्थायोत्थाय पौनःपुन्येन कंपवशात्पूर्वं पतित्वा अनंतरं उत्थायोत्थायेत्यर्थः, जीव हरे—जीवं स्वप्राणान् हरंति त्यजंति इति, विद्याधरः मंत्रिश्रेष्ठो भणति॥ अत्र प्रथमचरणे तृतीयः पंचमः षष्ठो गणः कर्णस्वरूपः, प्रथमो द्वितीयस्तुर्यः सप्तमोऽष्टमश्च सगणस्वरूपः, द्वितीयचरणे च द्वितीयतृतीयपंचमषष्ठगणाः कर्णस्वरूपा अन्ये च सगणस्वरूपाः, तृतीये चरणे च प्रथमतृतीयपंचमषष्ठसप्तमगणाः कर्णस्वरूपा अन्ये च सगणरूपाः, चतुर्थे च प्रथमपंचमौ गणौ कर्णरूपौ षष्ठतृतीयौ भगणरूपौ अन्ये च सगणरूपाः, इत्थं गणाः पतिताः,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ कुंडलिआ छंदः । (D).

दोहा लक्खण पढम पढि[1] कव्वह[2] अड्ढ णिरुत्त ।
कुंडलिआ बुहअण मुणह[3] उल्लाले[4] संजुत्त ॥
उल्लाले संजुत्त[5] जमक[6] सुद्धउ[7] सलहिज्जइ[8]
चउ[9]आलह सउ[10] मत्त सुकइ दिढ बंधु[11] कहिज्जइ[12] ।
चउ[13]आलह सउ[14] मत्त जासु तणु[15] भूसण सोहा[16]
एम[17] कुंडलिआ जाणहु[18] पढमपडि जह[19] दोहा ॥ १४६[20] ॥

---

विप्रस्तु न क्वचिदपि पतितस्तथापि सोऽपि यदि पतति तदापि बाधकं नास्तीति । (E).

१४५ । भअ इति ॥ भयभग्ना वंगा भग्नाः कलिंगास्तेलिंगा रणं मुक्त्वा चलिताः ॥ महाराष्ट्रा धृष्टा लीनकंठाः सौराष्ट्रा भयेन पादयोः पतिताः ॥ चंपारणाः कंपिताः पर्वतनिलीना उत्थायोत्थाय जीवाः पतंति ॥ काशीश्वर राजन् कृता उपाया विद्याधरेण बहु [भणते] मंत्रिवरेण ॥ ४६ ॥ (G).

---

१४६ । १ पढ (F). २ कव्वहि (F). ३ मुणऊ (A, B & E). ४ उल्लले (E). ५ Non est (B & E). ६ जमञ्च (F). ७ सुद्दइ (B). ८ सुलहिज्जसु (B), सलहिज्जसु (C). ९ चौ (E & F). १० सौ (E & F). ११ बंध (A & E). १२ कहिज्जसु (B), करिज्जइ (F). १३ चौ (F). १४ सौ (F). १५ भण (B). १६ सेहा (C). १७ तं (B & C), एमह (E). १८ जाण (A, B & C), मुणऊ (D & E). १९ पढम जहि पडिए (A), पढम पाठ चइ पुटि (B), पढम पढि चइ पढि (C), पढम पढि चइ जहँ (D & E). २० ४१ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१४६। दोहालक्षणं प्रथमं पठित्वा काव्यस्यार्द्धं निरुक्तं। कुण्डलिकां बुधजना जानीत उल्लालेन संयुक्ताम्। यमकशुद्धां श्लाघ्यचतुश्चत्वारिंशत्शतमात्राः कविना दृढबन्धाः कथ्यंते, चतुश्चत्वारिंशत्शतं मात्रा यस्यां तथा भूषणशोभां तां कुण्डलिकां जानीहि प्रथमं पठ्यते दोहा॥ एतस्य छन्दसः संपूर्णा दोहैव प्रथमार्द्धं, काव्यच्छन्दः संपूर्णं परार्द्धं, पादचतुष्टयादधिकपादस्य उल्लालसंज्ञा, यमकमत्रानुप्रासः पुनरावृत्त्या भवति यमकेन शुद्धः, अतएव श्लाघाविषयः, दृढबन्धता झढधघभादिमहाप्राणाक्षरयोगात्, भूषणमुपा[पमा]द्यलङ्कारः। प्रथमं दोहां पठित्वा कुण्डलिकेत्यर्थः॥ (C).

१४६। अथ कुंडलिकां लक्षयति दोहा लक्खणेति। बुहअण—बुधजनाः यस्याः पढम—प्रथमम् अद्ध—अर्द्धं, तथाच पूर्वार्द्धमित्यर्थः, दोहा लक्खण—द्विपदिकालक्षणं पठि—पठित्वा, णिरुत्त—निरुक्तं, द्विपदिकास्वरूपमेव यस्याः पूर्वार्द्धमित्यर्थः, द्वितीयं चेति शेषः अर्द्धमिति पूर्वानुषंगः, तथाच द्वितीयम् अर्द्धम् उत्तरार्द्धमित्यर्थः कब्बह—काव्येन निरुत्तं—काव्यस्वरूपं यस्याः उत्तरार्द्धमित्यर्थः उल्लाले संजुत्त—उल्लालेन संयुक्ताम्। उल्ललनम् उल्लालः कतिपयवर्णानां परावृत्य पठनमित्यर्थः कब्ब[—काव्येन] तेन सहितामित्यर्थः, तां कुंडलिआ—कुंडलिकां मुणऊ—जानीत, दूयं च उल्लाले संजुत्त जमअ—उल्लालसंयुक्तयमका उल्लालेन संयुक्तानि यमकानि सौसादृश्यवंत्यक्षराणि यस्यां तादृशीत्यर्थः, सुद्धउ—शुद्धा, सलहिज्जइ—श्लाघ्यते, तथाच न केवलमुल्लालयुक्तैवेयं विधेया किंतु यमकान्यपि देयानीति भावः। चौ[चउ]-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



आलह सउ मत्त सुकिअ दिढ बंधु — चतुश्चत्वारिंशदधिकशत-मात्रासुकृतदृढबंधा चतुश्चत्वारिंशदधिकशतमात्राभिः सुतरां कृतः दृढः बंधो योजनं यस्यां सा तादृशीत्यर्थः कहिज्जइ — कथ्यते। क्वचित्तु सुकइ दिढ बंधु इति पाठस्तत्र सुकविदृढबंधुनाम-कवि-परममित्रेण पिंगलेनेति यावत्। चतुश्चत्वारिंशदधिकं शतं मात्राः अत्र कथ्यंत इति भिन्नं भिन्नमेव योजनीयं, चउआलह सउ मत्त — चतुश्चत्वारिंशदधिकं शतं मात्राः जासु — यस्यां, तणु भूसण सोहा — तनुभूषणशोभाः शरीरभूषणानां शोभा इत्यर्थः जनयंतीति शेषः। एम कुंडलिआ मुणहु — एवं कुंडलिकां जानीत, पढम पढि जह दोहा — प्रथमं पठ्यते यत्र दोहा इति योजना॥ भावार्थस्तु — पूर्वार्द्धं पूर्वोक्तदोहावृत्तेन विधेयमुत्तरार्द्धं च पूर्वोक्त-काव्यवृत्तेन विधेयमित्युक्तं। तत्र यद्यपि दोहायां काव्ये च उल्लाल-यमकयोर्नियमो नोक्तस्तथाप्यत्र उल्लालो यमकं चेति द्वयमवश्यं विधेयमिति विशेषः। एवं च दोहाचरणचतुष्टयस्या अष्टचत्वारिंश-न्मात्राः काव्यचरणचतुष्टयस्याश्च षण्णवतिमात्रा एकीकृत्य चतु-श्चत्वारिंशदधिकशतं मात्राश्चरणाष्टकस्या इहावसेया इति विभाव-नीयम्। (E).

१४६। दोहेति॥ दोहालक्षणं प्रथमं पठ काव्येनार्द्धं निरुक्तं॥ कुंडलिकां बुधजना जानीत उल्लालेन संयुक्तं॥ उल्लालेन संयुक्तं यमकं शुद्धं श्लाघ्यते॥ चतुश्चत्वारिंशत् शतं मात्राः सुकविना दृढबंधाः क्रियंते, चतुश्चत्वारिंशन्मात्रा यत्र तनुभूषणशोभा॥ एवं कुंडलिकां जानीत प्रथमं पठ्यते यत्र दोहा॥ उल्लालेन परावृत्त्या

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

ढोल्ला[1] मारिअ ढिल्लि[2]मह[3] मुच्छिअ मेच्छ[4] सरीर।
पुर जज्जल्ला[5] मंतिबर[6] चलिअ[7] बीर हम्मीर[8]॥
चलिअ[7] बीर हम्मीर[8] पाअभर मेइणि[9] कंपइ
दिग मग णह अंधार धूलि सूरह रह[10] झंपइ।
दिग मग णह[11] अंधार आणु[12] खुरसाणक[13] ओल्ला[14]
दरमरि दमसि[15] बिपक्ख मारु[16] ढिल्लि[17]मह ढोल्ला॥
१४७[18]॥ कुंडलिआ।

स्वर[स]विशेषेण च दोहाकाव्याभ्यां कुंडलिका छंदः उल्लालयमकाभ्यां युक्ता श्लाघ्या भवति। प्रतिमात्रं संघट्टनादिगुणैरलंकारैश्च संयुक्ता चेत्प्रशस्ततरेति निष्कर्षः॥ उल्लालेत्यादि पादपूर्त्यर्थमिति केचित्॥ उल्लालः पदावृत्तिः, स्वरसविशेषश्च॥ ४७॥ (G).

१४७। उदाहरति। ढोल्लं मारयित्वा ढिल्लीमध्ये मूर्च्छितम्लेच्छशरीरः पुरोजुज्जुल्लामल्लवरश्चलितः वीरः हम्बीरः। चलितवीरहम्बीरपदभरेण मेदिनी कम्पते, दिङ्मार्गनभांस्यन्धकारः धूलिः

१४७। १ सेल्ला (D). २ ठिल्लि (B). ३ महि (F). ४ मच्छ (F). ५ जुज्जुल्ला (C), किष जज्जल (F). ६ मल्लवर (A, B & C). ७ चल्लि (A). ८ हमीर (A), हम्बीर (B & C), no repetition in (F). ९ मेषणि (F). १० सूराहर (A), सूरहर (B), सूरज रह (D & E), the pāda ending in झंपइ dropt in (C). ११ दिगगमण (F). १२ षाण (E), षणु (F). १३ खुरसाणक (A), खुरसाणुक (D). १४ ढोला (F). १५ दलमलिष दमसि (A), दरवलि दमसु (B & C), वर दमिष (F). १६ मारु (A, B, D & E), मरु (C). १७ डिल्लि (F). १८ ४२ (A), ४८ (F).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



सूर्य्यस्य रथं झम्पयति। दिङ्मार्गनभोऽन्धकारे आनीतः खुरशानस्य ओल्लः दलयित्वा दृष्ट्वा पत्तं मारितो ढिल्लीमध्ये ढोल्लः॥ ढोल्लं वाद्यविशेषं मारयित्वा संताड्य, ढिल्लीति इन्द्रप्रस्थस्य संज्ञा, मूर्च्छितानि म्लेच्छशरीराणि येन स तथा, जुज्जुल्ला नाम सेनापतिः स एव मल्लवरः सः [पुरो यस्य स] तथा, दिङ्मार्गनभांसि झम्पयत्याच्छादयति। ओल्लशब्दः पतिवाचकः। (C).

१४७। अथ कुंडलिकामुदाहरति ढोल्लेति। पुर जज्जल्ला मंतिवर — पुरोजज्जल्लमंत्रिवरः पुरोऽग्रे जज्जल्लनामा मंत्रिवरो यस्य स तादृश इत्यर्थः वीरहंमीरः चलित इति यदा ढिल्ली मह — डिल्लीमध्ये ढोल्ला — आनकः डिंडीरवार्थमिति भावः मारिअ — मारितस्ताडित इत्यर्थः, तदा मेच्छ सरीर — म्लेच्छशरीराणि मुच्छिअ — मूर्च्छितानि। अग्रेसरजज्जल्लाख्यमंत्रिवरो हंमीरनामा खनगराच्चलित इति फुत्कृत्य सर्वजनानां सावधानतासंपादनाय डिल्लीमध्ये यदा डिंडीरवार्थं पटहस्ताडितः तदा तच्छ्रुत्वा हंमीरागमनत्रस्ता म्लेच्छा मूर्च्छिता इति भावः॥ चलिअ बीर हंमीर पाअभर — * * पादभरेण मेदिनी पृथ्वी कंपइ — कंपते, धूलि — धूलिभिः सैन्यपादाघातोत्थरजोभिरित्यर्थः सूरज — सूर्यस्य [रह —] रथः झंपइ — आच्छाद्यते, ततश्च दिग मग णह — दिङ्नभोमार्गे अंधार — अंधकारः जात इति शेषः। दिग मग णह — दिङ्नभोमार्गे अंधार — अंधकारे सति खुरसाणक — खुरासानस्य देशस्य ओल्ला — दंडप्रतिनिधिभूताः पुरुषा आण — आनीता इति यद्यपि, तथापि हे वीर सुरत्राणेति संबोधनमध्याहर्त्तव्यं, त्वं दरमरि —

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढमहि दोहा चारि पत्र चउ[1]पत्र कव्वह[2] देहु[3] ।
एम[4] कुंडलित्रा अट्ठपत्र पत्रपत्र जम कुणेहु[5] ॥ १४८[6] ॥

दोहा । [इति] कुंडलित्रा । (A).

---

चरणतलैर्विमर्द्य विपक्ख—विपक्षान् [दमसि—] दमयसि, अतः दिल्ली मह—दिल्ल्या मध्ये ढोल्ला—पटहं मारु—ताड़य । यद्यपि हंमीरश्चलित इति श्रुत्वा अन्ये म्लेच्छा मूर्च्छिताः खुरासानदेशीयैश्च दंडप्रतिनिधिभूता मनुष्याः समर्पिताः, तथापि त्वया न भेतव्यं किंतु योद्धॄणां रणसज्जीभावाय पुनर्द्वितीयो डिंडीरवः त्वया कारणीय-इति किंचिदायस्तधैर्य्यं सुरत्राणं प्रति कस्यचिन्मंत्रिण उक्तिः । (E).

१४७ । यथा ॥ ढोल्लाख्यो देशो मारितः, शिथिला मही, मूर्च्छितं म्लेच्छशरीरम्, अत इति शेषः पुरः कृत्वा जज्जलं मंत्रिवरं चलिते वीरहम्मीरे चलितानां वीराणामहमहमिकया पादभरेण मेदिनी कंपते दिग्गगनमंधकारयंत्या धूल्या सूर्यस्य रथ आच्छाद्यते ॥ दिग्मार्गेष्वंधकारेऽन्यत् खुर[शा]णः कंपितो दरेण वरं कंपितो विपक्षस्ताड़ितो दिल्लीमध्ये दुंदुभिः ॥ ४८ ॥ (G).

१४८ । अथ दो[हा]च्छन्दसः पादचतुष्टयेन काव्यच्छन्दःपाद-चतुष्टयेन च कुण्डलिकाष्टपदा भवतीति सिद्धम् । तदेव स्पष्ट-यति । प्रथमतो दोहायाश्चत्वारि पदानि [चतुष्पदानि] काव्यस्य देहि, एवं कुंडलिकाष्टपदा पदे पदे यमकं कुरु ॥ (C).

---

१४८ । १ चौ (E & F). २ कब्बर (A), कव्वउ (C), काव्वह (E), कव्वह (F). ३ देहि (E), देह (F). ४ एव (C). ५ कुणेह (E), कुणेहि (F). ६ ४२ (A), ४९ (F). This verse is not found in (B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ गगनांगच्छंदः । (D).

पअ पअ ठवहु जाणि[१] गगणंगउ[२] मत्त[३] बिहूसिणा[४]
भावउ[५] बीस[६] कलअ[७] सर अग्गल[८] लहु गुरु सेसिणा[९] ।
पढमहि मत्त चारि गण[१०] किज्जहु[११] गणहि[१२] पआसिओ[१३]
बीसक्खर सअल[१४] पअहि[१५] पिअ[१६] गुरु अंत पआसिओ[१७] ॥
१४९[१८] ॥

---

१४८ । अथ दोहावृत्तेन पुनः स्पष्टीकृत्य कुंडलिकालक्षणमाह पढमहि इति । पढमहि—प्रथमे अर्द्धे इति भावः दोहा चारि पअ—दोहायाश्चत्वारि पदानि ततो द्वितीयार्द्धे कव्वह—काव्यस्य चउपअ—चत्वारि पदानि देहि, एवं कुंडलिका अष्टपदी, तत्र पादे पादे यमकानि क्रियन्तां ॥ यमकानीति उल्लालाना-मप्युपलक्षकम् । इदं चोदाहरणानंतरं लक्षणकथनमनौचित्यमावह-तीति क्षेपकमिवाभाति इति बोध्यम् । (E).

१४८ ॥ पढेति ॥ प्रथमेषु दोहां चतुःपदेषु, चतुःपदेषु काव्यं देहि ॥ एवं कुंडलिकाष्टपदा पदे पदे यमकं कुरु ॥ ४९ ॥ इति कुंडलिका ॥ (G).

---

१४९ । १ जान (B). २ गगणंक (C). ३ त्तम (C). ४ विभूसिणा (B & C), विछसिणा (E). ५ ताव्वउ (A), भाव्वउ (B & C), भावइ (E). ६ बीसइ (D & F). ७ कल (D & F), कइल (E). ८ अग्ग (E). ९ सोहिणा (C). १० गण चारि मत्त (B & C), मत्त दारि गण (D), चारि मत्त गण (E). ११ किज्जइ (D & E), दिज्जइ (F). १२ गणच्च (A & C), गणङ (B). १३ पआसि (C). १४ स लव (B & C), समद्दँ (D), सभ (E), सर सव (F). १५ वअह (E). १६ पि (F). १७ पसइओ (B). १८ ४४ (A), ५० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१४९ । अथ गगनाङ्गः ॥ पदे पदे स्थापय ज्ञात्वा गगनाङ्गं मात्राविभूषणं भागो विंशतिकलाः प[श]राधिकाः लघुगुरुशोभिताः । प्रथमे चतुर्मात्रो गणः क्रियतां गणाः प्रकाशिताः विंशत्यक्षराणि स लभते पदे प्रिये गुरुरन्ते प्रकाशितः ॥ मात्राविभूषणादिकमित्यनेन मात्रानियम एव नत्वत्र गणनियमइत्युक्तं भवति । विशेषमाह, भागः पादः, शराधिकाः पञ्चाधिकात्वेन पञ्चविंशतिकलाः पादाः लघुगुरुलक्षिता लघुगुरुविशोधि[भि]ताः, लघवो गुरवश्च यथेच्छं देया इति भावः, लघुयुक्तो गुरुरन्ते देय इत्यपरे । (C).

१४९ । अथ गगनांगनामकवृत्तं लक्षयति पअ पअ इति । हे पिअ—प्रियाः शिष्याः यत्र पढमहि—प्रथमपादादाविति यावत् चारि मत्त गण—चतुर्मात्राकः गणः किज्जइ—क्रियते, ततो यथेच्छं चतुष्कलैर्वैत्यध्याहारः, गणह—गणैः, यत् पआसिओ—प्रकाशितं, यत्र च गुरु अंत पआसिओ—अंतप्रकाशितगुरूणि अंते समाप्तौ प्रकाशितो गुरुर्येषु तादृशानीत्यर्थः, तथाच कर्त्तव्येषु विंशतितममक्षरं गुरुरूपमेव कार्यमिति भावः, बीसक्खर—विंशत्यक्षराणि, लभ पअह—सर्वेषु पादेषु प्रत्येकं पतन्तीति शेषः, तत् पअ पअ—पादे पादे प्रतिचरणमित्यर्थः, मत्त बिहूसिणा—मात्राविभूषितं गअणंगउ—गगनांगं गगनांगनामकं वृत्तं जाणि—ज्ञात्वा ठवह—स्थापयत । कियतीभिर्मात्राभिर्विभूषितमित्यपेक्षा[या]माह भावउ इति । अत्र लहु गुरु सेसिणा—लघुगुरुशेषिता लघुगुरुभ्यां समाप्तिं नीता इत्यर्थः सर अग्ग—शराधिकाः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढमहि[१] चक्कलु[२] होइ गण अंतहि[३] दिज्जहु[४] हारु[५]।
बीसक्खर गअणंग[६] भणु[७] मत्त पचीस[८] बिआरु॥
१५०[९]। दोहा।

शराः पंच तथाच पंचाधिका इत्यर्थः, बीसइ कल — विंशतिरेव कलाः भावउ — भावयत, तथाच पंचविंशतिर्मात्रा अत्र प्रतिचरणं पतंति, तास्वेव चांतिमं मात्रात्रयं लघुगुरुरूपं कार्यमित्यर्थः। अत्र च चतुर्ष्वपि चरणेषु पादादौ चतुष्कल एव गणः कार्यः, अनंतरं च चतुष्कलैः पंचकलैर्वा, यथा चरणे विंशत्यचराणि पंचविंशतिर्मात्राश्च पतंति, पादान्ते चावश्यं क्रमेण लघुर्गुरुश्चायाति तथैव गणा देया इति तात्पर्यार्थः। (E).

१४९। पञ्च इति॥ पदे पदे स्थापय ज्ञात्वा गगनांगणे मात्राविभूषिते भाव्यंतां विंशतिकलाः शराधिका लघुगुरुमिश्रिताः॥ प्रथमं मात्राचतुष्टयरूपो गणो दीयतां॥ गणाः प्रकाशमानाः अन्ये इति शेषः॥ विंशतिरचराणि शराः [?] सर्वाणि पादे प्रिये गुरुरंते प्रकाशितः॥ आदौ लघुचतुष्टयमंते गुरुः शेषाणि विंशतिरचराणि[?] यथेच्छं कार्याणीति भावः॥ ५०॥ (G).

१५०। विशेषान्तरमाह प्रथम इति। प्रथमे चतुष्कलो भवति गणोऽन्ते क्रि[दी]यते हारः। विंशत्यचरं गणं(ग)नाङ्कं भण मात्राः

---

१५०। १ पढमङ्ग (B & C). २ चक्कल (A & D). ३ अंतङ्ग (C), अंतइ (F). ४ दिज्जउ (C), डिज्जइ (D), दिज्जइ (E & F). ५ हार (A), ताव (D). ६ गगणंग (B), अनंग (C), अअणगण (F). ७ मन (A). ८ बीस (F). ९ ४५ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

भंजिअ मलअ चोल बइ णिबलिअ[1] गंजिअ गुज्जरा[2]

मालब राअ[3] मलअगिरि लुक्किअ परिहरि[4] कुंजरा ।

खुरासाण[5] खुहिअ रण मह मुहिअ[6] लंघिअ[7] साअरा

हम्मीर[8] चलिअ हारब[9] पलिअ[10] रिउगणह[11] काअरा[12] ॥

१५१[13] ॥ गगणांग[14] । (B).

---

पञ्चविंशतिं विचारय ॥ पदे प्राथमिको गणश्चतुर्मात्रः, परे गणाः प्रकाशिताः प्रकटा यथेच्छं कार्य्या इत्यर्थः । स ग[ग]नाङ्कपादो विंशत्यक्षराणि लभते, तेनात्र पञ्च गुरवः पञ्चदश लघवो भवन्ति, प्रिय सम्बोधनं, अन्ते च गुरुः कार्य्यः । तमेवार्थं निष्कृष्याह पढमेति । हारो गुरुः, पञ्चविंशतिमात्राः प्रतिपादं देयाः । (C).

१५० । अथैनमेवार्थं द्विपदिकया स्पष्टीकृत्याह पढम इति । यत्र पढमहि — प्रथमं पादादौ चक्कलु गण — चतुष्कलो गणः होइ — भवति, अंतहि — अंते पादांते दिज्जइ हार — दीयते हारः गुरुः, तत् गअणंग — गगनांगं भण — कथय, अत्र च बीसक्खर — विंशत्यक्षराणि, पचीस मत्त — पंचविंशतिर्मात्राः, बिआरु — विचारय ॥ (E).

---

१५१ । १ वलिअ (B & C). २ गुंजरा (B, C & E). ३ राउ (F). ४ परिहरिअ (D), परिहर (F). ५ खुरसाण (A & E), खुरसाणा (B & C), खुरासाणा (D). ६ मह अहिअ (D & F), मुहि अहिअ (E). ७ लम्बिअ (C). ८ हम्मीर (C). ९ हार (A), हाराव (E). १० वलिअ (F). ११ रिउसअल (A), रिउगण (B), अरिगण (C). १२ कादरा (F). १३ ४६ (A), ५२ (F). १४ गगणंग (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१५० । पुनः प्रकारांतरेणाह ॥ पढमेति ॥ प्रथमं चतुष्कलो भवति गणः अंते दीयतां हारः । विंशत्यक्षराणि गगनांगणे भण मात्राः पंचविंशतिं विचार्य ॥ ५१ ॥ (G).

१५१ । उदाहरति । भग्नो मलयश्चोलपतिश्च पलितः, गञ्जित-गुज्जरमालवराजो मलयगिरौ लुक्कायितः परिहृत्य कुञ्जरान् । खुरसाणाः क्षुभिताः रणमध्ये मोहं प्राप्ता लङ्घितसागराः हम्बीर-स्खलितः हारवः पतितः अरिगणाः कातराः ॥ (C).

१५१ । अथ गगनांगमुदाहरति भंजिअ इति । अहिअ लंघिअ साअरा—लंघितसागराहिते लंघितः सागरो यैस्तादृशा-अहिता यस्य तादृशे इत्यर्थः हंमीर चलिअ—हंमीरे चलिते सति, मलअ चोल वइ—मलयचोलपती मलयाधिपश्चोलदेशाधि-पश्चेति द्वावित्यर्थः भंजिअ—भग्नौ, गुञ्जरा—गुर्जराः गुर्जरदेशीयाः राजानः णिवलिअ—निर्वलीकृत्य गंजिअ—गंजिताः, मालव राअ—मालवराजः परिहरि कुंजरा—परिहृत्य कुंजरान् मलअगिरि—मलयगिरौ लुक्किअ—निलीनः, खुरसाण—खुर-सानः खुरसानदेशीयः राजा रण मुहि—रणे मुग्धीभूय खुहिअ—क्षुभितः, काअरा—कातरे पलायितुमप्यसमर्थे तस्मिन्नित्यर्थः रिउगण—रिपुगणे हारवः पतितः ॥ (E).

१५१ । यथा ॥ भंजिअ इति ॥ भग्नो मलयश्चोलपतिर्निवृत्तो गंजितो गुर्जरः । मालवराजो मलयगिरौ निलीनः परिहृत्य कुंजरान् ॥ खुरासानः क्षुभित्वा रणमध्येऽभितो लंघितः सागरं, हम्मीरे चलिते हा रवन्तो[रवो] रिपुगणेषु कातरेषु ॥ ५२ ॥ इति गगनांगणम् ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ द्विपदीच्छंदः। (D).

आइग[1] इंदु जत्थ[2] हो[3] पढमहि[4]
दिज्जइ[5] बेबि[6] धणुहरं[7]।
तह पाइक्क[8] जुअल परिसंठबहु[9]
बिबिह[10] चित्त[11] सुंदरं॥ १५२॥
सरसइ[12] लइ[13] पसाउ[14] तहि[15] पुहबिहि[16]
करहि[17] कइत्त[18] कइअणा[19]।
महुअर[20]चरण अंत लइ[21] दिज्जहु[22]
दोअइ[23] भणहु[24] बुहअणा॥ १५३[25]॥

---

१५२—१५३। अथ द्विपदीच्छन्दः। आदाविन्द्रो यत्र भवति प्रथमं दीयेते द्वावपि धनुर्द्धरौ [रौ], तथा पदातिकयुगलं परिस्थापय विविधविचित्रसुन्दरं॥ सरस्वत्याः लब्ध्वा प्रसादं तर्हि पृथिव्यां कवित्वं कुरुत कविजनाः। मधुकरचरणोऽन्ते गृहीत्वा दीयतां द्विपदीं

---

१५२—१५३। १ पइहि (A), आइगइ (E). २ जतह (A). ३ Non est (C). ४ पढम (F). ५ दिज्जिअ (A), दिज्जहि (C). ६ तिषि (D & F). ७ धणूहरं (D & E). ८ ताइक्क (B). ९ परिसंठज्ञ (A). १० विधि (D & F). ११ विचित्त (A, C & D), विचित्र (B), विछित्त (F). १२ सरइ (E). १३ Non est (B), लुइ (E). १४ पसाइ (A). १५ तहँ (D), तह (F). १६ पुहविह (A), पुहमी (D), पुहवी (F). १७ वर (A), करह (D & F), करज्ञ (E). १८ कवित्त (A & D), कवित (F). १९ कइयाण (F). २० मज्ञर (D & F). २१ ले (E), लेइ (F). २२ दिज्जइ (E), दिज्जउ (F). २३ दोइवइ (E). २४ भणइ (B), सुणज्ञ (D & F), सुणह (E). २५ ४७ (A), ५२ (F).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



भणत बुधजनाः ॥ इन्द्रशब्दो मध्यद्विलघुषट्कलवाची, धनुर्द्धरश्चतुष्कलः, पदातिकोऽपि चतुष्कलः, मधुकरचरणः षट्कलः । (C).

१५२—१५३ । अथ[द्वि]पदीनामकं वृत्तं लक्षयति आइगेति । हे बुहअणा — बुधजनाः, जत्थ — यत्र पढम[हि]—[प्रथमे] चरणे, इदं चोपलक्षणं द्वितीयेऽपि बोध्यम्, आइग — आदिगः आदिस्थः पादाद्य इति यावत् इंदु: — षट्कलो भवति, ततश्च बेबि धणूहरं — द्वौ धनुर्द्धरौ चतुष्कलाविति यावत् दिज्जइ — दीयेते, तथा पाइक्क जुअल — पदातियुगलं पुनरपि चतुष्कलयुगलमेवेत्यर्थः परिसंठवऊ — परिस्थापयत, अंत — अंते पादांते मऊअरचरण — मधुकरचरणः षट्कल इत्यर्थः दिज्जइ — दीयते, एवं दोवइ — द्विपदीं भणत, तहि — तथा हे कइअणा — कविजनाः, सरसइ ले[सु]इ पसाअ[उ] — सरस्वत्याः सकाशाद्गृहीत्वा प्रसादं पुहबिहि — पृथिव्यां विविह चित्त सुंदरं — विविधचित्तसुंदरं विविधानि अनेकप्रकाराणि यानि चित्तानि तेषां रमणीयं सर्वलोकमनोहरमित्यर्थः कइत्त — कथि[वि]त्वं अनेन च वृत्तेनेति शेषः करहु — कुरुत, अनेन छंदसा निर्मितं कवित्वं सर्वजनमनोहरं भवतीति भाव इति योजना ।

अत्र यद्यपि इंदुशब्दः लघुद्वयोत्तरगुरुद्वयात्मक-षट्कलवाची, तथाप्यत्र षट्कलसामान्यपरोऽवसेयः, उदाहरणे तथैव दर्शनात् । मधुकरचरणशब्दस्य यद्यपि षट्कलनामसु पूर्वं नोपात्तस्तथापि मधुकरचरणानां षट्त्वसंख्यासत्त्वादत्रापि तत्पुरस्कारेणैव षट्कलपरो बोध्यः । क्वचित्तु दिज्जइ तिण्णि धणुहरमिति पाठः, सः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



छक्कलु मुह[1] संठावि[2] कहु[3] चक्कलु पंच ठवेहु[4] ।
अंतहि एक्कइ[5] हार दइ[6] दोअइ[7] छंद[8] कहेहु[9] ॥
१५४[10] ॥ दोहा ।

---

प्रामादिकः, एवं सति पादांते षट्कलगणालाभेन मऊअर चरण अंत लेद्द दिज्जसु इत्यग्रेतनेन विरोधात् । एतत्पाठानुसारेणैव कैश्चिदग्रे मऊर चरणेति पाठं प्रकल्प्य तस्य च मुग्धशब्दस्य गुरुनामस्वरूपात्त्वात्तत्पर्यायत्वान्मधुरोगुरुस्तथाच मधुरो गुरुः अंत—चरणांते दीयतामित्यर्थः कृतस्तदपि भ्रमविलसितं, लक्षणस्यापि लक्ष्यतायां मऊर चरणेति पाठे कल्प्यमाने एकमात्रान्यूनतया लक्षणासंगतेः । (E).

१५२—१५३ । अथ द्विपदीमाह ॥ आईति ॥ आदिगुरुरिंदुर्यत्र भवति प्रथमं दीयते त्रयो धनुर्द्धराः ॥ ततः पदातियुगलं परिसंस्थापय विधिना विहितं सुंदरं ॥ सरसेति ॥ सरस्वत्या गृहीत्वा प्रसादं ततः पृथिव्यां कुरुत कवित्वं कविजनाः । मधुरं चरणमंते गृहीत्वा दीयतां द्विपदीं जानीत बुधजनाः ॥ मधुरो गुरुः ॥ (G).

१५४ । उक्तार्थमेव स्पष्टीकुर्व्वन् विशेषान्तरमाह षट्कलमिति । षट्कलं मुखे संस्थाप्य चतुष्कलान् पञ्च स्थापय । अन्ते एकं हारं

---

१५४ । १ छकल मुह (A), छक्कलुअ मुह (B), छधलु मुअ (D). २ संठाणि (F). ३ कर (D), कर (E), चहि (F). ४ करेअ (D & F), कारिहि (E). ५ पएंद (A), एक्कहि (B & C). ६ देइ (A, D & E). ७ दोवइ (D). ८ कंतु (B). ९ करअ (A, B & C). १० ४८ (A), ५४ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



भणत बुधजनाः ॥ इन्द्रशब्दो मध्यद्विलघुषट्कलवाची, धनुर्द्धरश्चतुष्कलः, पदातिकोऽपि चतुष्कलः, मधुकरचरणः षट्कलः । (C).

१५२—१५३ । अथ[द्वि]पदीनामकं वृत्तं लक्षयति आइगेति । हे बुहअणा — बुधजनाः, जत्थ — यत्र पढम[हि]—[प्रथमे] चरणे, इदं चोपलक्षणं द्वितीयेऽपि बोध्यम्, आइग — आदिगः आदिस्थः पादाद्य-इति यावत् इंदुः — षट्कलो भवति, ततश्च बेबि धणूहरं — द्वौ धनुर्द्धरौ चतुष्कलाविति यावत् दिज्जइ — दीयेते, तथा पाइक्क जुअल — पदातियुगलं पुनरपि चतुष्कलयुगलमेवेत्यर्थः परिसंठवऊ — परिस्थापयत, अंत — अंते पादांते मऊअरचरण — मधुकरचरणः षट्कल इत्यर्थः दिज्जइ — दीयते, एवं दोवइ — द्विपदीं भणत, तहि — तथा हे कइअणा — कविजनाः, सरसइ ले[सु]इ पसाअ[उ] — सरस्वत्याः सकाशाद्गृहीत्वा प्रसादं पुहविहि — पृथिव्यां विविह चित्त सुंदरं — विविधचित्तसुंदरं विविधानि अनेकप्रकाराणि यानि चित्तानि तेषां रमणीयं सर्वलोकमनोहर-मित्यर्थः कइत्त — कवि[वि]त्वं अनेन च वृत्तेनेति शेषः करह — कुरुत, अनेन छंदसा निर्मितं कवित्वं सर्वजनमनोहरं भवतीति भाव इति योजना ।

अत्र यद्यपि इंदुशब्दः लघुद्वयोत्तरगुरुद्वयात्मक-षट्कलवाची, तथाप्यत्र षट्कलसामान्यपरोऽवसेयः, उदाहरणे तथैव दर्शनात् । मधुकरचरणशब्दस्य यद्यपि षट्कलनामसु पूर्वं नोपात्तस्तथापि मधुकरचरणानां षट्त्वसंख्यासत्त्वादत्रापि तत्पुरस्कारेणैव षट्कल-परो बोध्यः । क्वचित्तु दिज्जइ तिण्णि धणुहरमिति पाठः, सः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



छक्कलु मुह[1] संठावि[2] कहु[3] चक्कलु पंच ठवेहु[4] ।
अंतहि एक्कइ[5] हार दइ[6] दोअइ[7] छंद[8] कहेहु[9] ॥
१५४[10] ॥ दोहा ।

---

प्रामादिकः, एवं सति पादांते षट्कलगणालाभेन मऊअर चरण अंत लेइ दिज्जसु इत्यग्रेतनेन विरोधात् । एतत्पाठानुसारेणैव केश्चिदग्रे मऊर चरणेति पाठं प्रकल्प्य तस्य च मुग्धशब्दस्य गुरु-नामसूपात्तत्वात्तत्पर्यायत्वान्मधुरोगुरुस्तथाच मधुरो गुरुः अंत—चरणांते दीयतामित्यर्थः कृतस्तदपि भ्रमविलसितं, लक्षणस्यापि लक्ष्यतायां मऊर चरणेति पाठे कल्प्यमाने एकमात्रान्यूनतया लक्षणासंगतेः । (E).

१५२—१५३ । अथ द्विपदीमाह ॥ आईति ॥ आदिगुरुरिंदुर्यत्र भवति प्रथमं दीयते त्रयो धनुर्द्धराः ॥ ततः पदातियुगलं परि-संस्थापय विधिना विहितं सुंदरं ॥ सरसेति ॥ सरस्वत्या गृहीत्वा प्रसादं ततः पृथिव्यां कुरुत कवित्वं कविजनाः । मधुरं चरणमंते गृहीत्वा दीयतां द्विपदीं जानीत बुधजनाः ॥ मधुरो गुरुः ॥ (G).

१५४ । उक्तार्थमेव स्पष्टीकुर्व्वन् विशेषान्तरमाह षट्कलमिति । षट्कलं मुखे संस्थाप्य चतुष्कलान् पञ्च स्थापय । अन्ते एकं हारं

---

१५४ । १ छक्कल मुख (A), छक्कलुअ मुह (B), छधलु मुअ (D). २ संठाणि (F). ३ कर (D), कइ (E), थप्पि (F). ४ करेज्ज (D & F), कारेहि (E). ५ परेंद (A), एक्कहि (B & C). ६ देइ (A, D & E). ७ दीवइ (D). ८ वंतु (B). ९ करउ (A, B & C). १० ४८ (A), ५४ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

दाणव[1] देव बेवि ढुक्कंतउ[2] गिरिवर[3] सिहर कंपिओ[4] ।
हअ गअ पाअ[5] घाअ उट्ठंतउ धूलिहि गअण[6] झंपिओ[7] ॥
१५५[8] ॥ दोअइ । (A, B, C & F).

---

दत्त्वा द्विपदीच्छन्दः कथय ॥ मुखे आदौ, हारं गुरुं, पूर्वं यः षट्कलः अन्ते दातव्यत्वेनोक्तः तत्रायं विशेषः चतुष्कलान्ते गुरुरेक इति । (C).

१५४ । अथ उट्टवनिकांतरं मनसि विधाय दोहावृत्तेन पुनर्द्विपदीं लक्षयति छक्कलु इति । छक्कलु — षट्कलं मुह संठाबिकइ — मुखे आदौ संस्थाप्य, पंच चक्कलु — चतुष्कलान् करेऊ — कुरुत, अंतहि — पादांते एक्कहि — एकमेव हारं गुरुं देइ — दत्त्वा, दोवइ छंद कहेऊ — द्विपदीच्छंदः कथयत । पूर्वं षट्कलानंतरं चत्वारश्चतुष्कलास्तदनंतरं च पुनः षट्कल इत्युक्तम्, इदानीं तु पादांतस्थषट्कलांतर्गतं चतुष्कलं चित्ते कृत्वा षट्कलानंतरं पंच चतुष्कला उक्तास्तदनंतरं च षट्कलांतर्गतस्य मात्रायुगस्योर्वरितत्वात्तस्यैवैको गुरुर्देय इत्युक्तमित्युट्टवनिकाकृतः एवं पूर्वापरयोर्भेदः । इदं च वृत्तं द्विपादमेव न [च]तुष्पादं, उदाहरणानुरोधादिति केचित् । अन्ये तु यदीदं द्विपादमेव, तर्हि लक्षणं पादचतुष्टयेन कथं कृतमिति इदं चतुष्पादमेव, न चोदाहरणविरोधस्तस्य चरणद्वयेनापि संभवात्, न चैतादृशमन्यत्र न दृष्टमिति वाच्यं, षोडशचरणायाश्चतुःपादिकाया एकस्यैव चरणस्योदाहृतत्वादित्याहुः ।

---

१५५ । १ दाणव (E). २ ढुक्कंतुउ (D). ३ गिरिवरु (D). ४ कंपओ (C). ५ पअ (D). ६ गअण (D). ७ ओपिओ (F). ८ ४९ (A), ५५ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



अथ झुल्लणा छंदः । (D).

पढम दह दिज्जिआ, पुणबि तह किज्जिआ,
पुणबि दहसत्त तह[1] बिरइ जाआ ।
एम परि बिबिहु दल[2], मत्त सततीस पल[3],
एहु कह[4] झुल्लणा[5] णाअराआ[6] ॥ १५६ ॥*

परे तु लक्षणं वृत्तद्वयेन कृतमितीदमुदाहरणानुरोधाद्द्विपाद-मित्याहुः । (E).

१५४ । दोहया पुनस्तत् प्रकारांतरेणाह ॥ छक्केति ॥ षट्कल-मादौ स्थापयित्वा चतुष्कलान् पं[च] कुरु । अंते एकं हारं दत्त्वा द्विपदीच्छंदः कथय ॥ ५४ ॥ (G).

१५५ । उदाहरति । देवदानवाभ्यां द्वाभ्यामपि ढौक्यमानं गिरिशिखरं कम्पितं, हयगजपदघातादुत्तिष्ठन्तीभिर्धूलिभिर्गगनं झम्पितं ॥ ढौक्यमानं गम्यमानं, झम्पितमाच्छादितम् । (C).

१५५ । अथ द्विपदीमुदाहरति दा (E). [Here evidently some-thing has been left out by the scribe.—Ed.]

१५५ । यथा ॥ दाणेति ॥ दानवदेवौ द्वावपि मिलितौ गिरिवरशिखरं कंपितं । हयगजपादघातैरुत्थिताभिर्धूलिभिर्गगन-माच्छादितम् ॥ ५५ ॥ इति द्विपदी ॥ (G).

१५६ । अथ झुल्लणानामकं वृत्तं लक्षयति पढम दहेति । जह — यत्र, बिरइ — विरतिः पढम — प्रथमम् आदौ दह —

१५६ । १ जह (E). २ ढल (E). ३ ल (D). ४ Dropt in (E). ५ भल्लउ (F). ६ रा dropt in (F). * This śloka and the next are not found in (A, B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, सहस मअमत्त[1] गअ, लाख[2] लख[2] पक्खरिअ,
साहि दुइ साजि खेलंत गिंद्दु[3] ।
कोप्पि[4] पिअ जाहि तहि, थप्पि[5] जसु बिमल महि,
जिणइ[6] णहि[7] कोइ[8] तुअ तुलक हिंदु ॥ १५७ ॥

दशसु मात्रास्विति शेषोऽत्रापि योजनीयः, दिज्जिआ — दत्ता पुणवि — पुनरपि तह — तथा तेनैव प्रकारेण दशस्वेव मात्रास्वित्यर्थः किज्जिआ — कृता, पुणवि — पुनरपि दहसत्त — सप्तदशसु मात्रासु जाआ — जाता, एम परि — एवं परिपाट्या बिबिहु दल — द्वयोर्दलयोः प्रत्येकमिति शेषः, सततीस — सप्तत्रिंशत् मत्त — मात्राः पल — पतंति, एहु — एनां [णाअराआ] — नागराजः झुल्लणां कह — कथयति ॥ (E).

१५६ । अथोल्लणा ॥ पढमेति ॥ प्रथमं दश दत्ताः, पुनरपि तथा कृताः, पुनरपि सप्तदश तथा विरतिर्जाता ॥ एवं प्रकारेणापि द्वितीये दले मात्राः सप्तविं[त्रिं]शत्पतंति, एनां कथयत्युल्लणां नागराजः ॥ उल्लणा झुल्लणा उल्पणेति पाठत्रयम् ॥ ५६ ॥ (G).

१५७ । अथ झुल्लणामुदाहरति सहसेति । सहस मअमत्त गअ — सहस्रं मदोन्मत्तगजान् लक्ख लक्ख — लक्षं लक्षम् अश्वांश्चेति शेषः पक्खरिअ — वारवाणेनावगुंठ्य साजि — सज्जीभूय साहि दुइ — सार्वभौमद्वयं गिंदु — कंदुकं खेलंत — क्रीडतः, हे प्रिय, तहि — तत्र

१५७ । १ मअमर (D). २ लक्ख (E). ३ This part non est (F). ४ कोप्पी (E). ५ कप्पि (D), थप्पु (E). ६ जिणाइ (D). ७ हिपइ (F). ८ कोवि (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ खंजच्छंदः। (D).

धुअ[1] धरिअ[2] दिअबर[3] णवगण[4] कमलणअणि
बुहअण[5] मण सुहइ[6] जु जिम[7] ससि रअणि सोहए।
पुणबिअ[8] बिरइ बिहु पअ[9] गअबरगमणि
रगणपर[10] फणिवइ[11] भण[12] सुमरु[13] बुहअण[14] मोहए॥
१५८[15]॥

कोप्पि — प्रकुप्य जाहि — गच्छ, विमलं जसु — यशः महि — मह्यां [मह्यां] थप्पु — स्थापय, तुअ — त्वां कोइ — कोऽपि तुलुक — तुरुष्कः हिंदू — [हिन्दु]को वा णहि जिणइ — नहि जेष्यति॥ (E).

१५७। यथा॥ सहसेति॥ सहस्रं मदमत्तान् गजान् लक्षम् अश्वान् कृतपल्ययनान् स्वामिद्वयं सज्जीकृत्य खेलति गेंदुकं। कुपित्वा प्रिय याहि तत्र स्थापय यशो विमलं मह्यां जेष्यति न कोऽपि त्वां तुरुष्को हिंदुकः॥ ५७॥ (G).

१५८। अथ खञ्जा॥ ध्रुवं धारय द्विजवरनवगणान् कमलनयने बुधजनमनसि शोभते यथा शशिरजनी शोभते, पुनरपि विरतिर्द्वयोः पदयोः गजवरगमने रगणपरा भणति फणिपतिः

१५८। १ धुव (B). २ वरि (D & F). ३ दिअवर (A). ४ णउगण (A), dropt in (B), गण (D). ५ बुअअण (C), बिबुह (D & F), बिशुहअण (E). ६ सहइ (C). ७ जिमि (D & F). ८ पुणवि (C). ९ पअ (A), पुअ (B), अअ (E), दअ (F). १० रअण बर (D, E & F). ११ कणिवइ (D & E). १२ भणु (D & F). १३ भुव (E). १४ मणु (D & F). १५ ५० (A), ५८ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



स्मर बुधमनो मोहयति ॥ ध्रुवं निश्चितं धारय, द्विजवरः सर्व्वलघुः चतुष्कलस्तादृशान् नव गणान्, शशियुक्ता रजनी शशिरजनी। पुनर्विशेषः द्वयोरपि पादयोर्विरतौ रगणपरा रगणः ऽ।ऽ परोऽन्तो यस्याः सा तथापरेति स्मर्त्तव्यमेतदिति भावः। (C).

१५८। अथ खंजानामकं वृत्तं लक्षयति धुअ धरिअ इति। हे कमलणअणि—हे कमलनयने, यत्र बिहु पअ—पादद्वये प्रत्येकमिति शेषः दिअबर णवगण—द्विजवरनवगणान् षट्त्रिंशल्लघूनित्यर्थः धरिअ—धृत्वा अवलंब्येति यावत् बिरइ—विरतिर्भवतीति शेषः, पुणबिअ—पुनरपि च तदनन्तरं चेत्यर्थः रअण—रगणः मध्यलघुर्गण इत्यर्थः बुहअण मोहए—बुधजनं मोहयतीति भावः, जु—यतः बुहअण मण सुहइ—बुधजनमनः सुखयति, यथा रजन्यां शशी सोहए—शोभते, तत् खंजावृत्तमिति शेषः, हे गजवरगमने त्वं सुमरु—स्मर पौनःपुन्येन भावयेत्यर्थः, इति वर फणिवइ—वरः फणिपतिः पिंगलः भणइ—भणति इति योजना॥ यत्र षट्त्रिंशल्लघ्वनन्तरं रगणः प्रतिचरणं पतति तत् खंजानामकं वृत्तमिति फलितोऽर्थः। इदं च द्विपदमेवेति ध्येयम्। (E).

१५८। धुअ इति॥ ध्रुवं धृत्वा द्विजवरान् नवगणान् कमलनयने विबुधजनमनः सुखयति यद्यथा शशी रजन्यां शोभते। पुनरपि च विरतिर्द्वयोर्दलयोर्गजगमने रगणो वरः फणिपतिर्भणति स्मरणं बुधमनो मोहयति॥ षट्त्रिंशल्लघूत्तरं रगणः कार्य इत्यर्थः, सा खंजेति भावः॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**बिहु[1] दल णव पल बिप्पगण जोहल[2] अंत ठवेहु[3] ।**
**मत्त इआलिस[4] खंज पअ दहगण[5] तत्थ[6] मुणेहु ॥**
**१५९[7] ॥ दोहा ।**

---

१५९ । एतदेव स्पष्टयन् विशेषान्तरमाह। द्वयोर्द्वयोर्नव पतन्ति विप्रगणा जोहलमन्ते स्थापय । मात्रा एकचत्वारिंशत् खञ्जायां पदे पदे यमकं कुरुत ॥ द्वयोरिति पूर्व्वपदेऽपि तथेत्यर्थः, जोहलो मध्यलघुः पञ्चकलः । एवं क्रमेण खञ्जायां प्रतिपादमेकचत्वारिंशन्मात्रा भवन्ति । यमकमनुप्रासः । (C).

१५९ । अथ दोहावृत्तेन स्पष्टीकृत्य खंजां लक्षयति बिहु दलेति । बिहु दल — द्वयोर्दलयोः प्रत्येकमिति शेषः णव बिप्पगण — [नव] विप्रगणान् पल — प्रकटयत, अंत — पादांते जोहलु — योद्धारं मध्यलघुं रगणमित्यर्थः ठवेहु — स्थापयत, एवं खंज पअ — खंजापादे खंजानामकस्य वृत्तस्य चरणे इत्यर्थः एआलिस मत्त — एकचत्वारिंशन्मात्राः, दहगण — दश गणान् तत्थ — तथ्यं मुणेहु — जानीत ॥ (E).

१५९ । लक्षणांतरमाह ॥ बिउइति ॥ द्वयोर्दलयोर्नव पतंति विप्रगणाः जोहलमंते स्थापय । मात्रा एकचत्वारिंशत्, खंजापादे दश गणान् तथा जानीत ॥ ५९ । (G).

---

१५९ । १ बिउ (F). २ जोहलु (B, C & E). ३ ठवेहु (D). ४ एआरिस (A), एआलिस (B, C & E). ५ पअ जमअ (C). ६ तण्हि (A), तन्नि (C). ७ ५१ (A).

This is different from the metre of the same name in the Sanskrit treatise of Pingala. Vide Ghosha's Compendium, p. 56.



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

अहि[१] ललइ महि[२] चलइ[३] गिरि खसइ[४] हर खलइ
ससि घुमइ अमिअ बमइ[५] मुअल जिबि[६] उट्ठए ।
पुणु[७] धसइ पुणु[७] खसइ पुणु[७] ललइ[८] पुणु[७] घुमइ[९]
पुणु[१०] बमइ जिबिअ[११] बिबिह परि समर[१२] दिट्ठए ॥

१६०[१३] ॥ खंजा (A, B & C).

---

१६० । उदाहरति । मही लोलते, अहिस्खलति, गिरिः पतति, हरः स्खलति, शशी घूर्णते, अमृतं वमति, भटा जीविलोत्तिष्ठन्ते । पुनर्द्धावति, पुनः स्खलति, पुनर्लोलते, पुनस्खलति, पुनर्घूर्णते, अमृतं वमति, विविधप्रकारो रणो दृश्यते ॥ कस्यचिद्युद्धं वर्ण्यते, तत्र युद्धे भूकम्पादयो वर्ण्यन्ते । (C).

१६० । अथ खंजामुदाहरति अहीति । अहि ललइ — अहिः शेषः लल[य]ति स्थानच्युतो भवतीत्यर्थः, योद्धृणां पादाघातेनेति भावः । अतएव महि — मही पृथ्वी चलइ — चलति, अतएव मह्याश्रितः गिरिः कैलासः खसइ — पतति, ततश्च तदाश्रितो हरः खलइ — स्खलति, ततश्च तदा[ङ्गा]लस्थः शशी घुमइ — क्रू[घू]र्णते, अतएव अमिअ बमइ — अमृतं वमति, ततश्चामृतसंपर्कात्

---

१६० । १ महि (A, B & C). २ अहि (A, B & C). ३ पलइ (A & B). ४ चलइ (A, B & C), रपल (F). ५ Dropt in (A), चमइ (F). ६ पुणु जिवइ (A), भअ जिविअ (B), भट जिविअ (C), मुअल जिविअ (E). ७ पुण (E & F). ८ चलइ (C). ९ पुणु चलइ (A). १० अमिअ (A, B & C), पुण (E & F). ११ Non est (A, B & C), जीविअ (E), विजिअ (F). १२ रण (A, B & C). १३ ५२ (A), ६० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ सिखा छंद । (D).

ससिबअणि गअगमणि पअ पअ
दिअ छगण[1] पअहर[2] सह[3] सिक्ख ।
पढ पढम बि बिहलहु[4] पअलि दिअगण
सहिउ[5] जुअल[6] दल भणइ[7] स सिक्ख ॥ १९१[8] ॥

मुअल—मृताः जिविअ—जीविता उट्ठए—उत्तिष्ठंति, ततश्च जीवितानान्तेषां चरणाघातेन पुणु धसइ—पुनरधो गच्छति मही, पुणु खसइ—पुनः स्खलति कैलासः, पुणु ललइ—पुनर्लल[य]ति स्थानच्युतो भवति शिवः, ततश्च पुण घुमइ—पुनर्घूर्णते शशी, पुण बमइ—पुनर्वमत्यमृतं, पुनश्च जिबिअ—जीविता उत्थिता मृताः इति समरे विविधकौतुकं परिदिट्ठए—परिदृश्यते ॥ (E).

१९० ॥ यथा अहीति ॥ अहिर्लल[य]ति, मही चलइ[ति], गिरिः पतति, हरः स्खलति, शशी घूर्णते, अमृतं वमति, मृताः जीवंतो भवंति ॥ एवं सतीति शेषः पुन * * ति, पुनः स्खलति, पुनर्लल[य]ति, पुनः घूर्णति, पुनर्वमति, जीविता विविधाः, एवं प्रकारेण समरो दृश्यते ॥ ९० ॥ (G).

१९१ । १ छ गण (A), च्छ गण (B & C), गण छ (E) २ पओहर (D). ३ स (B & F), च स (C, D & E). ४ लहु विविह (D), ल dropt in (F). ५ सहिअ (B & C), लहिउ (D), सहिअ (E), लहिज (F). ६ जुअह (D & E). ७ भजरहि (B). ८ ५१ (A), ९१ (F). Vide metre of the same name, but of a different character, in the Sanskrit treatise of Pingala. Ghosha's Compendium, pp. 26 and 56.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१६१ । अथ शिखाच्छन्दः ॥ शशिवदने गजगमने पदे पदे द्विजाः षड्गणाः पयोधरसशिखाः । पठ प्रथमं विविधलघुकं प्रकथ्य द्विजवरगणमधिकं भण शिचख ॥ द्विजः सर्व्वलघुश्चतुष्कलः, तादृशाः षड्गणाः आदौ यत्र पयोधरः जगणः, तत्र शिखा । द्वितीयदले द्विद्विलघून् पूर्व्वोक्तान् प्रकथ्य पठत, तत्र द्विजवरगणं सर्व्वलघुचतुष्कलमधिकं भण, तेन द्वितीयदले सप्तद्विजवरगणा अन्तरं[अन्ते] जगण इति विशेषः, एवं शिखाच्छन्दः शिचखेत्यर्थः ॥ (C).

१६१ । अथ शिखां लचयति ससिवअणीति । हे शशिवदने गजगमने पअ पअ — पदे पदे प्रतिचरणमित्यर्थः पअहरह ससिक्ख — सपयोधरशिखान् पयोधरो मध्यगुरुर्जगणस्तथा च सपयोधरा सजगणा शिखा अग्रभागो येषां तादृशान् अंतस्थितजगणानित्यर्थः दिअगण क — द्विजगणान् चतुर्लघ्वात्मकगणान् षट् पढ — पठ द्वयोरपि दलयोः षड्द्विजगणानंतरं जगणं स्थापयेत्यर्थः । परंतु जुअह दल — द्वितीयदलं पढम — प्रथमम् आदौ वि विलहु — द्वौ द्विलघू द्वौ द्विलघ्वात्मकगणावित्यर्थः पअलि — प्रकटीकृत्य अपरमेकं द्विजगणं प्रकटीकृत्येत्यर्थः, दिअगण सहिअ — जगणसहितं द्विजगणैः पूर्वोक्तप्रकारेणाग्रस्थितजगणैः षड्भिर्युक्तमिति भावः, पठ इत्यनुषंगः । प्रथमं लघुद्वयात्मकगणद्वयं संस्थाप्य अनंतरमंतस्थितजगणैः षड्द्विजगणैः सहितं द्वितीयं दलं पठेत्यर्थः, तथाच प्रथमदले अंतस्थजगणाः षडेव द्विजगणाः पतंति, द्वितीयदले तु अंत्यजगणाः सप्त द्विजगणाः पतंतीति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**मत्त अठाइस[१] पढमो[२] बीए बत्तीस मत्ताइँ ।**
**पत्र पत्र अंते लहुआ सुद्धा सिक्खा विआणेहु[३] ॥१६२[४]॥**
**गाहू ।**

---

भावः, सिक्ख—शिखां विद्धि इति शेषः, इति स प्रसिद्धः पिंगलः भणइ—भणति ॥ (E).

१६१ । अथ शिखा ॥ ससौति ॥ शशिवदने गजगमने पदे पदे द्विजाः षड्गणाः पयोधरसशिखाः । पठ प्रथमं द्वितीये खलु प्रपतति द्विजगणो लघुर्द्वयो युगलदलयोर्भण्यते सा शिखा ॥ सशिखाः सहिताः ॥ द्विजस्चतुर्लघुः ॥ पयोधरः य[ज]गणः ॥ प्रथमे षड्द्विजा अंते जगणः, द्वितीये सप्त द्विजा अंते जगणः इति भावः ॥ ६१ ॥ (G).

१६२ । उक्तार्थं स्पष्टयन्नाह । मात्रा अष्टाविंशतिः प्रथमे, द्वितीये द्वावि[त्रिं]शन्मात्राः । पदे पदे जगणोऽन्तेलघुकां शुद्धां जानीहि शिखाम् ॥ (C).

१६२ । अथ गाहूच्छंदसा प्रकटीकृत्य पुनः शिखां लक्षयति मत्त अठाइसेति । यत्र पढम[हि]—प्रथमे पत्र—पदे मत्त अठाइस—मात्रा अष्टाविंशतिः पतंतीति शेषः, बीए—द्वितीये पत्र—पदे बत्तीस—द्वात्रिंशत् मत्ताइँ—मात्राः पतंति, अंते—पादांते लहुआ—लघुः जगणस्येति भावः नियमेन पतति, तां शुद्धां शिखां विजानीत ॥ अत्र अंते लहुआ इति दलद्वयेऽप्यंते

---

१६२ । १ अठाउस (A). २ पढमे (A), पढमहि (E), पढम (F). ३ विआण (E). ४ ५४ (A), ६२ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, फुलिअ[1] महु[2] भमर[3] बहु[4] रअणि पहु
किरण लहु[5] अबअरु[6] बसंत ।
मलअगिरि कुहर[7] धरि पवण[8] बह
सहब[9] कह[10] सुणु[11] सहि णिअल णहि कंत ॥
१६३[12] ॥ सिक्खा । (A, B & C).

---

जगणोऽवश्यं देय इति सूचनीयं, षड्द्विजगणानां चतुर्विंशतिर्मात्रा अंत्यजगणस्य च मात्राचतुष्टयमेवमष्टाविंशतिर्मात्राः प्रथमचरणे, सप्तद्विजगणानामष्टाविंशतिर्मात्रा अंत्यजगणस्य च मात्राचतुष्टयमेवं द्वात्रिंशन्मात्रा द्वितीयचरणे पतंति यत्र, तत् शिखानामकं वृत्तमिति फलितार्थः । (E).

१६२ । तदेव गाहृच्छंदसाह ॥ मत्तेति ॥ मात्रा अष्टाविंशतिः प्रथमे, द्वितीये द्वात्रिंशन्मात्राः । पदपदयोरंते लघुः, शुद्धां शिखां विजानीत ॥ ६२ ॥ (G).

१६३ । उदाहरति ॥ फुल्लति मधुके भ्रमरा बहवः रजनिप्रभुकिरणा मलयावतीर्णो वसन्तः । मलयगिरिकुसुमं धृत्वा पवनो वहति, सोढव्यः कथं शृणु भण सखि निकटे न हि कान्तः ॥ धृत्वा स्पृष्ट्वा । (C).

---

१६३ । १ फुल्लिअ (A & F). २ मह (A). ३ भमब (E). ४ रऊ (D). ५ लु (C), बपऊ (D), बऊ (F). ६ अवर (A), dropt in (F). ७ कुसुम (C). ८ पुवण (B). ९ Dropt in (C), सवह (F). १० कत (D). ११ सुण (A), भण (C, D & F). १२ ५५ (A), ६२ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ मालाच्छंदः । (D).

पढम चरण ससिबअणि मिअणअणि[1] णाव दिअगण[2]
पअल पुणबि तह[3] रअण[4] ठवहु[5] अंतए कसो ।
पिंगल णाअ भणंता[6] माला सेसम्मि[7] गाहस्स[8] ॥१६४[9]॥

१६३ । अथ शिखामुदाहरति फुलिअ इति । भमरु बङ्क— बङ्कभ्रमराः मङ्क—मधूका मधूकवृक्षाः फुलिअ—पुष्पिताः, रअणि पङ्क—रजनीप्रभुश्चंद्रः किरण लङ्क—लघुकिरणः, वसंतः अवअरु—अवतीर्णः । मलयगिरिगह्वरं धृत्वा स्पृष्ट्वेति यावत् पवण वह—[पवनः] वहति, सहब कह—सहिष्ये कथं भणु सखि निकटे नास्ति कांतः ॥ (E).

१६३ ॥ यथा फुल्लीति ॥ पुष्पितो मधूको भ्रमरा बहवो रजनीपतेः किरणा बहव आयातोऽन्यद्वसंतः । मलयगिरिकुहरं धृत्वा पवनो वहति, सोढव्यं कथं भण सखि निकटे नास्ति कांतः ॥ ६३ ॥ इति शिखा ॥ (G).

१६४ । अथ मालाच्छन्दः ॥ प्रथमचरणे शशिवदने मृगनयने नव द्विजगणाः प्रकटाः, पुनरपि तथा रगणः स्थाप्यतामन्ते कर्णः । पिङ्गलनागो भणति मालां शेषमपि गाहायाः ॥ सर्व्वलघुचतुष्कल-नवगणानन्तरं रगणस्ततः कर्णो गुरुयुगमेवं पञ्चचत्वारिंशन्मात्रः प्रथमः पादः, गाहाशेषार्द्धं शेष इत्यर्थः । (C).

१६४ । १ गअगमणि (A). २ दिअपण (F). ३ णह (A), पुण (B), तरह (C). ४ गण (C). ५ ठम (E), ठवहि (F). ६ भणन्ता (D). ७ सेसंपि (D), सेसंषि (F). ८ गाहष (A), गाहस्स (F). ९ ५६ (A), ६४ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढम होइ णव विप्पगण जोहल[1] कण्ण ठवेहु ।
गाहा[2] अद्धा अंत दइ[3] माला छंद कहेहु[4] ॥ १६५[5] ॥
दोहा ।

---

१६४ । अथ मालावृत्तं लक्षयति पढमेति । हे शशिवदने मृगनयने यत्र पढम चरण—प्रथमचरणे णव दिअगण—नव द्विजगणाः नव चतुर्लघ्वा[ध्वा]त्मका गणाः पअल—पतंति, पुणवि—पुनरपि नवद्विजगणानंतरमित्यर्थः तह—तथा रअण ठव—रगणं मध्यलघुगणं स्थापय, अंतए—अंते रगणांते पादांते वा कण्णो—कर्णो गुरुद्वयात्मको गणः पतति इति शेषः, ततः गाहस्स—गाथायाः सेसम्मि—शेष उत्तरार्द्धमिति यावत् पततीत्यनुषंगः, सा माला हि—तन्मालानामकं वृत्तमिति पिंगल णाअ—पिंगलनागः भणंता भणति ॥ (E).

१६४ । अथ मालामाह ॥ पढमेति ॥ प्रथमे चरणे शशिवदने मृगनयने नव द्विजाः पतंति, पुनरपि ततो रगणः स्थाप्योऽंते कर्णः । पिंगलनागो भणति मालां शेषं विगाथायाः ॥ द्विजश्चतुर्लघुः, द्वितीये सप्तविंशतिर्मात्रा इत्यर्थः ॥ ५४ ॥ (G).

१६५ । अमुमेवार्थं स्पष्टयति । प्रथमतो भवन्ति नव विप्रगणाः जोहलकर्णौ स्थापय । गाहाया अर्द्धमन्त्यपदं मालाच्छन्दो जानीहि ॥ जोहलो रगणः । (C).

---

१६५ । १ जोहलु (B & C). २ गाह (A). ३ देइ (A & E), देआ (F). ४ करेहु (A). ५ ५७ (A), ९५ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

बरिस जल भमइ घण गअण सिअल[1] पवण मणहरण

कणअ पिअरि णचइ[2] बिजुरि[3] फुल्लिआ णीवा[4] ।

पत्थर[5] बित्थर[6] हिअला[7] पिअला[8] णिअलं[9] ण आवेइ[10] ॥

१६६[11] ॥ माला (A, B & C).

---

१६५ । अथ दोहावृत्तेन स्पष्टीकृत्य पुनर्मालां लक्षयति पढमेति । पढम — प्रथमे चरणे णव बिप्पगण — नव विप्रगणाश्चतुर्लघ्वात्मकगणाः होइ — भवंति, ततश्च जोहलु कस — योद्धृकर्णौ रगणगुरुद्वयात्मकगणौ ठवेऊ — स्थापयत । ततः गाहा — गाथायाः अंत — अंत्यम् अद्धा — अर्द्धम् उत्तरार्द्धमित्यर्थः देइ — दत्वा, मालाच्छंदः कहेऊ — कथयत ॥ अत्र देइ इत्येकारो ह्रस्वो ज्ञेयः । यत्र प्रथमचरणे नवचतुर्लघ्वात्मकगण-रगण-गुरुद्वयात्मकगणाः पतंति द्वितीयदलं च गाथोत्तरार्द्धस्वरूपं भवति, तन्मालानामकं वृत्तमिति फलितार्थः । (E).

१६५ । पढेति ॥ प्रथमं भवंति नवविप्रगणा जोहलकर्णं स्थापय । गाथार्द्धमंतिमे मालाच्छंदः कथ्यताम् ॥ जोहलो रगणः, कर्णो द्विगुरुः ॥ ६५ ॥ (G).

---

१६६ । १ सलज्ञ (A, B & C). २ णच्चइ (A). ३ विजुरी (F). ४ णीवा (F). ५ पतत्थर (A). ६ वितत्थर (A). ७ हिअआ (B & C), हिअणा (E). ८ पिअणा (C & F). ९ णिलअं (B & C), णिअला (D & F). १० आवेइ (A & E). ११ ५८ (A), ६६ (F).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



### अथ चुलिआला छंद । (D).

चुलिआला जइ देह[1] किमु[2]
दोहा उप्पर[3] मत्तह[4] पंचइ ।
पअ पअ उप्पर संठवहु
सुद्ध कुसुमगण अंतह[5] दिज्जइ[6] ॥ १६७[0] ॥

१६६ । उदाहरति । वर्षति जलं भ्रमति घनः गगने, मलयपवनो मनोहरणः, कनकपीता नृत्यति विद्युत्, फुल्लिता नीपाः । प्रस्तरविस्तारहृदयः प्रियो निकटं नायाति ॥ प्रस्तरविस्तार इति काठिन्यद्योतनार्थम । (C).

१६६ । मालामुदाहरति वरिसेति । घण — घनः मेघः गअण — गगने भमइ — भ्रमति, जल — जलं वरिस — वर्षति, मणहरण — मनोहरः सिअल — शीतलः पवण — पवनः वातः वातीति शेषः, कणअ पिअरि — कनकपीता बिजुरि — विद्युत् णचइ — नृत्यति, णीवा — नीपाः कदम्बाः फुल्लिआ — पुष्पिताः । पत्थर वित्थर हिअणा — प्रस्तरविस्तीर्णहृदयः पिअणा — प्रियः णिअलं — निकटे ण आवेइ — नायाति ॥ (E).

१६६ । यथा ॥ बरीति ॥ वर्षति जलं भ्रमति घनो गगने, शीतलः पवनो मनोहरः, कनकपीता नृत्यति विद्युत्, पुष्पिता नीपाः। प्रस्तरविस्तृतहृदयः प्रियो निकटे नायाति ॥ ६६ ॥ इति माला ॥ (G).

१६७ । १ देहि (B & C). २ किम (A), किम (B & C). ३ उप्परि (A). ४ मत्तहि (E & F). ५ अन्तत (A), अन्तत (B), अंतहि (C & F). ६ दिज्जइ (A), दिज्जइ (B), पअहि (C). ० ५.९ (A), ६० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१६७। चूतिकाला यदि ददासि किन्तु दोहोपरि [मात्राः] पञ्च। पदे पदेऽन्ते संस्थापय शुद्धं कुसुमगणमन्तेऽपि ॥ संपूर्णदोहा-नन्तरं मात्रापञ्चकमिति। इयं हि द्विपदी, तत्र दोहापूर्व्वार्द्धा-नन्तरं मात्रापञ्चकदाने एकः पादः, एवं द्वितीयेऽपि पञ्चकलः। कीदृश इत्यत्राह कुसुमगण इति। लघ्वादिलघुद्वयान्तो गुरु-रित्यर्थः। (C).

१६७। अथ चुलिआलानामकं वृत्तं लक्षयति, चुलिआलेति। दोहा उप्पर—दोहोपरि दोहायामिति यावत् मत्तहि पंचइ—मात्राः पंच यदि देह—दीयते, तदा चुलिआला कह[?]—चुलि-आलां कथय। ननु[नु] दोहायां किं प्रतिचरणे उत प्रतिदले वा क देयाः पंचमात्रा इत्यत आह, पअ पअ उप्परेति,—पद-पदोपरि, अत्र पदशब्दो दलवाची उदाहरणानुरोधात्, तथाच एकैकदले इत्यर्थः, संठवहु—संस्थापयत पंचमात्रा इत्यनुषंगः। ननु सर्वलघुरूपा उत गुरुलघुरूपा चेति कीदृश्य एकैकदलेऽन्ते आदौ वा स्थाप्या इत्यत आह, सुद्धेति,—शुद्धः कुसुमगण आदौ एको लघुस्तत एको गुरुस्ततो लघुद्वयमेतादृशो गण इत्यर्थः। अंतह—अंते दिज्जइ—दीयते॥ एवं च दोहाया एकदलांते यदि पंचमात्राः कुसुमगणस्वरूपा दीयंते, तदा चुलिआलानामकं वृत्तं भवतीति फलितार्थः। (E).

१६७। अथ चूलिका॥ चुलीति॥ चुलिआला [?] यदि दीयते किं दोहाया उपरि मात्राः पंच। पदे पदे उपरि संस्थापय शुद्धं कुसुमगण[?]मंते दीयते॥ एकोनत्रिंशन्मात्राः पदे पदे कार्यास्तन्मध्ये

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



दोहा संखा[1] संठवहु उप्परि[2] पंचइ[3] मत्त ।
अट्ठदहुप्परि[4] बीसदुइ[5] चुलिआला उक्खित्त[6] ॥ १६८[7] ।
दोहा ।

---

अंतिमाः पंचमात्राः कुसुमगणरूपा इति ॥ कुसुमं लघुगुरुद्विलघुरूपं ।ऽ।। बोध्यम् ॥ ६७ ॥ (G).

१६८ । उक्तार्थं स्पष्टयति । दोहासंख्यां [संस्था]पय उपरि पञ्चकमात्राः । अष्टादशोपरि विंशतिद्वयं चुलिआला उत्क्षिप्ता ॥ दोहासंख्या दोहार्द्धमात्रासंख्या, तथाच दोहार्द्धे चतुर्विंशतिमात्रास्तत्र मात्रापञ्चकदाने ऊनत्रिंशन्मात्रा भवन्ति, एतद्द्विगुणे अष्टपञ्चाशन्मात्रा भवन्ति । एतदेवोत्तरार्द्धेनाह । उत्क्षिप्ता उत्थिता । (C).

१६८ । अथैनमेवार्थं दोहावृत्तेन पुनराह, दोहालक्खणेति । आदौ दोहालक्खण—दोहालक्षणम् उप्परि—उपरि तदनंतरमित्यर्थः पंचइ मत्त—पंचैव मात्राः संठवऊ—[सं]स्थापयत, एवं अट्ठदऊप्परि बीसदुइ—अष्टादशोपरि विंशतिद्वयेन मात्राणामिति शेषः, अष्टपंचाशन्मात्राभिरित्यर्थः, चुलिआला उक्खित्त—उक्ता ।

---

१६८ । १ सक्खा (C), लक्षण (E). २ उप्पर (A, B & C). ३ पंचइ (C). ४ अट्ठदह्लपरि (A), अट्ठद उप्परि (C), अट्ठदुऊप्परि (D). ५ वीसदइ (B), विसदुइ (C). ६ उक्किट्ठ (A), उक्किथ्यु (B). ७ ६० (A), ६८ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, राश्रा लुद्ध[1] समाज खल[2]
बहु कलहारिणी[णि][3] सेवक धुत्तउ ।
जीवण[4] चाहसि सुक्ख जइ[5]
परिहर[6] घर जइ[7] बहुगुणजुत्तउ ॥ १६६[8] ॥
चुलिश्राला । (A, B & C).

---

क्वचिद्दोहासंखा संठवऊ इति पाठस्तत्र आदौ दोहासंखा—दोहा-संख्यां दोहामात्रासंख्याकमात्रामिति यावत् इति व्याख्येयम् । (E).

१६८ । दोहेति ॥ दोहासंख्यां स्थापयोपरि पंचमात्राः । अष्टादशोपरि विंशतिद्वयं चुलिश्रालायां व्याख्यातम् ॥ अष्ट-पंचाशन्मात्राः कार्या इत्यर्थः ॥ ६८ ॥ (G).

१६९ । उदाहरति । राजा लुब्धः, समाजः खलः, वधूः कलह-कारिणी, सेवको धूर्त्तः । जीवने चाहसि [?] सुखं यदि, परिहर गृहं यदि बहुगुणयुक्तम् ॥ वधूः स्त्री, परिहर त्यज, बहुतरानर्थ-सम्भवादित्यर्थः । (C).

१६९ । चुलिश्रालामुदाहरति राश्रा लुद्धेति । राजा लुब्धः, समाजः खलः, वधूः कलहकारिणी, सेवको धूर्त्तः । अतः जइ—यदि बहुगुणजुत्तउ—बहुगुणयुक्तमपि बहुभिः कीर्त्तिप्रतिष्ठा-

---

१६९ । १ लुध्ध (F). २ ख dropt in (A). ३ करिष्वाणि (A, D & E). ४ जिवण (A). ५ जउ (A), दइ (B), सजइ (F). ६ परिहव (E & F). ७ थमु रइं (D). ८ ६१ (A), ६९ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ सोरट्ठा छंद । (D).

सो सोरट्ठउ[1] जाण[2] जं[3] दोहा बिबरीअ[4] ठिअ[5] ।
पअ पअ जमक[6] बखाण णाअराअ पिंगल[7] कहिअ[8] ॥
१७०[9] ॥

---

प्रमुखैर्गुणैः सहितमपीत्यर्थः जीवंतः[वनं] अथच सुखं चाहसि—वांछसि, तइ—तदा घर—गृहं परिहरु—त्यजेत्यर्थः ॥ (E).

१६९ । यथा ॥ राआ इति ॥ राजा लुब्धः, समाजः खलः, वधूः कलहकारिणी, से[व]को धूर्त्तः । जीवनं वांछसि सुखं च यदि, परिहर गृहं, तर्हि बहुगुणयुक्तः ॥ ६९ ॥ (G).

१७० । अथ सौराष्ट्रम् । तत् सौराष्ट्रं जानीहि यद्दोहाविपरीतं स्थितं । पदे पदे यमकं नागराजपिंगलेन कथितम् ॥ प्रथमतृतीयपादयोरेकादशमात्रात्वं, द्वितीयचतुर्थयोस्त्रयोदशमात्रात्वमिति दोहावैपरीत्यं, पदे पदे इति प्रथमतृतीयपादयोरन्ते द्वितीयचतुर्थयोरन्ते च, यमकमनुप्रासं व्याचक्ष्व कथय कुर्विति यावत् । (C).

१७० । अथ सौराष्ट्रनामकं वृत्तं लक्षयति सो सोरट्ठउ इति । जं—यत् दोहा विवरीअ ठिअ—दोहाविपरीतस्थिति दोहातो

---

१७० । १ सोरट्ठउ (A). २ जाणु (E). ३ जइ (A). ४ विवरिअ (A), विपरिअ (B), विपरीआ (C), विररी (E). ५ Non est (C), दिअ (E), ट्ठिअ (F). ६ जमक (D). ७ पिंगलु (D), पिंगं (E). ८ कहइ (D & F), कुणइ (E). ९ ६२ (A), ७० (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

सो माणिअ पुणबंत[1] जासु भत्त पंडिअ तणअ ।
जासु घरिणि[2] गुणबंति[3] सो[4] बि[5] पुहवि सग्गह[6] णिलअ ॥
१७१[7] ॥ सोरट्ठा । (A, B & C).

---

विपरीता स्थितिश्चरणानां स्थापनं यस्य तादृशमित्यर्थः, सो — तत् सोरट्ठउ — सौराष्ट्रं सौराष्ट्रनामकं वृत्तं जाणु — जानीहि, तत्र च पअ पअ — पादे पादे प्रतिचरणमित्यर्थः जमक बखाण — यमकं श्लाघय इति णाअराअ पिंगल — नागराजपिंगलः भणइ — भणति ॥ अयं भावः — दोहायाः प्रथमतृतीयचरणयोस्त्रयोदशमात्राः द्वितीयचतुर्थयोश्चैकादशमात्रा देया इति दोहालक्षणेनोक्तं, तद्वैपरीत्येनात्र द्वितीयचतुर्थचरणयोस्त्रयोदशमात्राः प्रथमतृतीययोश्चैकादशमात्रा देया इति । (E).

१७० । सो इति ॥ तत्सौराष्ट्रं जानीहि यद्विपरीतं दोहास्थिति । पदे पदे यमकं व्याख्याहि नागराजः पिंगलः कथयति ॥ यमकमनुप्रासः ॥ विपरीतेति ॥ एकादश त्रयोदशेति भावः ॥ ७० ॥ (G).

१७१ । उदाहरति । स मन्यते पुण्यवान् यस्य भक्तः पण्डितस्तनयः । यस्य गृहिणी गुणवती तस्य पृथिवी स्वर्गनिलयः ॥ (C).

---

१७१ । १ पुणश्वंत (A), पुणमन्ति (B), पुणमंत (C & E). २ घरणि (E & F). ३ गुणमन्ति (B), गुणवन्त (C), गुणमत्ति (D), गुणमंत (F). ४ से (E & F). ५ विश्व (F). ६ सग्ग (C & F). ७ ९२ (A), ७१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ हाकलि छंद । (D).

सगणा भगणा दिअगण ई[1] मत्त चउद्दह[2] पअ पलई[3] ।
संठइ[4] बंको बिरइ[5] तहा[6] हाकलि[7] रूअउ[8] एम[9] कहा ॥
१७२[10] ॥

---

१७१ । अथ सौराष्ट्रमुदाहरति सो माणिअ इति । स मान्यः पुण्यः गुणवंत — गुणवान् यस्य भक्तः पंडित[स्त]नयः, यस्य गृहिणी गुणवती, से बि — अस्यापि पुहवि — पृथ्वी सग्गह णिलअ — स्वर्गनिलयः स्वर्गवास इत्यर्थः ॥ (E).

१७१ । सो माणीति ॥ स मान्यः पुण्यवान् यस्य भक्तः पंडितस्तनयः । यस्य गृहिणी गुणवती तस्यैव पृथिव्यां स्वर्गनिलयः ॥ [स्वर्ग] निवासः ॥ ७१ ॥ सौराष्ट्रम् ॥ (G).

१७२ । अथ हाकलीच्छन्दः । सगण-भगण--द्विजगणा मात्राश्चतुर्दश पदे पतन्ति । संस्थाप्य विरतौ वक्रं तथा हाकलीरूपम् एतत् कथितम् ॥ अर्थात् पिङ्गलेन । अयमर्थः । सगण-भगण-द्विजगणाः स्थाप्याः, नत्वेषां स्थाने नियमः, किन्तु पदानामन्तगुरुत्वं नियतं, सगणद्वयान्ते भगणद्वयान्ते द्विजगणास्ततो गुरुरेवं क्रमेण एकादशाक्षराणि भवन्ति । यदि द्विजगणं विहाय सगणभगणाभ्यां यथेच्छं गणत्रयं कृत्वाप्यन्ते गुरुर्दीयते तदा

---

१७२ । १ भागण ज दिअगणइ (D). २ चउदह (D). ३ पलइ (B & D). ४ संठ (C). ५ विरई वक्क (B & C), वंका थंत (F). ६ जहा (D). ७ हाकलिअ (B). ८ रूअइ (E & F). ९ एक (D). १० ६४ (A), ७२ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



दशाक्षराणि भवन्ति, किन्त्वन्तिमगुरोः पूर्व्वं सगणो न देय इति सम्प्रदायः । (C).

१७२ । अथ हाकलीनामकं वृत्तं लक्षयति सगणेति । जहा—यत्र सगणा—सगणो गुर्वंतश्चतुष्कल इत्यर्थः, भगणा—भगणो गुर्वादिश्चतुष्कल इत्यर्थः, दिअगण—द्विजगणश्चतुर्लघ्वात्मको गण इत्यर्थः, ई—एते गणा इत्यर्थः, अथच मत्त चउद्दह—मात्राश्चतुर्दश पअ पलई—पादे पतंति पादांते चेति शेषः, बंको—वक्रमेकं गुरुं संठइ—संस्थाप्य, बिरइ—विरतिर्भवति, अंतिमगुरोः प्रागेव विरतिरित्यर्थः । एऊ—एतत् हाकलिरूअह—हाकलीरूपं हाकलिनामकवृत्तस्य स्वरूपमित्यर्थः कहा—कथितम् । अत्र सगण-भगण-द्विजगणातिरिक्तो गणो [न] भवतीति, एत एव च स[म]स्ता व्यस्ता वा पतंतीति नियमस्तथाच यदि सगणत्रयानंतरं भगणत्रयानंतरं द्विजगणत्रयानंतरं वा एको गुरुः स्थाप्यते प्रतिचरणं, तथापि हाकलीवृत्तं भवति । अथ एकस्मिंश्चरणे सगणत्रयानंतरमेकं गुरुं [सं]स्थाप्य तदितरचरणेषु भगणत्रयानंतरं द्विजगणत्रयानंतरं परस्परसंसृष्टैतद्द्वयानंतरं वा गुरुः स्थाप्यते, तदाप्येतद्वृत्तं भवति । अथ एकस्मिंश्चरणे भगणत्रयानंतरं द्विजगणत्रयानंतरं वा एकं गुरुं संस्थाप्य तदितरेषु परस्परसंसृष्टैतत्त्रयानंतरं गुरुः स्थाप्यते तथाप्येतद्वृत्तं भवतीति न विभावनीयम् । (E).

१७२ । सगणो भगणो द्विजगणो मात्राश्चतुर्दश पदे पतंति । संस्थापय वक्रमंते तथा हाकलिरूपमेवं कथय ॥ वक्रो गुरुः ॥ ७२ ॥ (G).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



मत्त चउद्दह पढम दल[१] एआरह[२] बसेहि[३] ।
दह अक्खर उत्तर दलहि[४] हाकलि[५] छंद[६] कहेहि ॥*
१७३[७] ॥ दोहा ।

---

१७३ । मात्राश्चतुर्दश पदे पदे पतन्ति, एकादशवर्णैः । दशाक्षराण्युत्तरदले हाकलिच्छन्दः कथय ॥ (C).

१७३ । अथ नियमांतरमंगीकृत्य पुनर्हाकलीवृत्तं लक्षयति, मत्त चउद्दहेति । पढम दल—प्रथमदले पूर्वार्द्धे इति यावत् प्रतिचरणमिति शेषः, क्वचित्तु पअह पअ इति पाठस्तत्र पादे पादे अर्थात्पूर्वार्द्धस्य, उत्तरदले इत्यग्रे उक्तत्वादिति बोध्यम्, एगारह वसेहि—एकादशवर्णैः कृत्वा मत्त चउद्दह—मात्राश्चतुर्दश, उत्तर दलहि—उत्तरदले उत्तरार्द्धे इत्यर्थः प्रतिचरणम् इत्यनुषंगः, दह अक्खर—दशाक्षरैश्चतुर्दशमात्राः इत्यनुषंगः यत्र पतंतीति शेषः, तत् हाकलि छंद कहेहि—हाकलीनामकं छंदः कथय ॥ अत्र च प्रथमद्वितीयचरणयोर्द्विजगणैर्देय एव, अन्यथा एकादशाक्षरोक्त्यसंभवापत्तिः । तृतीयचतुर्थयोस्तु द्विजगणेनैव देयः अन्यथा दशाक्षरोक्त्यसंभवापत्तिः, इति नियमे तात्पर्यमुन्नीयते । तथाहि क्रमेण विपर्ययेण वा सगण-भगणौ अथवा सगणद्वयमेव

---

१७३ । १ पढम पअ (C), पअ पअहि (F). २ इगारह (C), एगारह (D), एग्गारह (E). ३ वषेति (E). ४ दलह (B & C). ५ हालि (C), काकलि (F). ६ छन्द (B & C), छंदु (E). * This śloka is not found in (A). ७ ७१ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

उच्चउ छाअण[1] बिमल घरा[2] तरुणी घरिणी[3] बिणअपरा[4] ।
बित्तक पूरल[5] मुद्दहरा[6] बरिसा[7] समआ सुक्खकरा ॥
१७४[8] ॥ हाकलि । (A, B, C & F.)

---

भगणद्वयमेव वा [सं]स्थाप्य यदि द्विजगणो दीयते अंते च गुरुर्दीयते, तदैवाचरषट्कं सगणभगणयोरचरचतुष्टयं च द्विजग[ण]स्य एकमचरं च गुरोरेवमेकादशाचराणि पूर्वार्द्धे प्रतिचरणं पतंति, उत्तरार्द्धेऽपि चेदेवं द्विजगणः स्थाप्यते तत्राप्येकादशाचराणि स्युः, तस्मादुत्तरार्द्धे सगणत्रयोत्तरं भगणत्रयानंतरं वा परस्परसंसृष्टैतत्त्रयानंतरं वा गुरुः प्रतिचरणं स्थाप्यते तदैवोत्तरार्द्धे दशाचराणि पतंति, एवं च प्रथम-द्वितीयचरणयोर्द्विजगणदानमंगीकृतपूर्वं लचणकृता, **तदनंगीकारेण चैतल्लचणमित्यस्मत्तातचरणोपदिष्टः पंथाः सुधीभिर्विभाव्यः । (E).

१७३ । मत्तेति ॥ मात्राश्चतुर्दश पदे पदे एकादशवर्णाः । दशा-चराण्युत्तरदले हाकलिच्छंदः कथय ॥ ७३ ॥ (G).

१७४ । उदाहरति । उच्चोठानकं विमलं गृहं, तरुणी गृहिणी विनयपरा । वित्तेन पूर्णं मुद्रागृहं, वर्षासमयः सुखकरः ॥ उठान-शब्दोऽङ्गनवाची, मुद्रागृहं कोषागारम् । अत्र च यदि तदेत्यध्या-हार्य्यम् । (C).

---

१७४ । १ उच्चउ छावण (A), उच्च उठाचण (C), उच्चउ च्छावणि (D & F). २ घरा (A). ३ घरणी (A), घरुणी (F). ४ विणअकरा (B & C). ५ पूरण (B & C). ६ मुदंघरा (D), मूलघरा (F). ७ वरिखा (A), वरीसा (D). ८ ६५ (A), ७२ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



## अथ मधुभारच्छंदः । (D).

जसु पलइ[१] सेक्ख[२] पअहरह[३] एक्क[४] ।
चउमत्त[५] बेबि[६] महुभार[७] एबि[८] ॥ १७५[९] ॥

---

१७४ । अथोत्तरलक्षणाभिप्रायेण हाकलीमुदाहरति उच्चेति । यस्य उत्तमाच्छादितं विमलं गृहं, तरुणी विनयपरा गृहिणी कांता, वित्तपूर्णं मुद्रागृहं के[को]शभांडमित्यर्थः, तस्य वर्षासमयः सुखकरः ॥ (E).

१७४ । यथा ॥ उच्चेति ॥ उच्चमाच्छादनं विमलगृहं, तरुणी गृहिणी विनयपरा । वित्तपूर्णं कोशगृहं, वर्षासमयः सौख्यकरः ॥ तस्येति शेषः ॥ ७४ ॥ हाकलीति ॥ (G).

१७५ । अथ मधुभारच्छन्दः ॥ यस्य पतति शेषे पयोधर[एकः] । चतुर्मात्रिकौ द्वौ मधुभार एवं ॥ एकचातुर्मात्रिकानन्तरं पयोधरो जगणः मिलिला द्वौ चातुर्मात्रिकौ । (C).

१७५ । अथ मधुभारनामकं वृत्तं लक्षयति जसु पलईति । जसु—यस्य चरणे इति शेषः चउमत्त बेबि—चतुर्मात्रिकौ द्वौ पततः, सेख—शेषे पादांते इत्यर्थः एक्क—एकः चतुर्मात्रिक-इत्यर्थः [पल]इ—पतति, कर्त्तव्ययोर्द्वयोस्तुर्मात्रिकयोस्त्वांतिम-

---

१७५ । १ पलई (F). २ सेख (A & E), सेस (F). ३ पअहरअ (B & C), पअरहअ (E), पओहर (F). ४ एक (F). ५ चामत्त (D), चौमत्त (F). ६ वेधि (A), तेअ (D), तीअ (F). ७ मऊहार (B & C), मधुभार (E). ८ आवि (D), अवि (F). ९ ६६ (A), ७५ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, जसु चंद[1] सीस पिंधणह[2] दीस ।

सो संभु एउ[3] तुह[4] सुभ्भ[5] देउ ॥ १७६[6] ॥

मधुभार[7] । (A & F).

अथाभीरच्छंदः । (D).

गारह[1] मत्त करीज अंत पत्रोहर दीज ।

एहु[2] सुछंद[3] अहीर[4] जंपइ[5] पिंगल धीर[6] ॥ १७७[7] ॥

---

स्वतुर्मात्रिको जगणस्वरूप एव पततीत्यर्थः, एवि—एतत्, मधु-भारनामकमेतद्वृत्तमित्यर्थः । (E).

१७५ । जसु इति ॥ यस्य पतति शीर्षे पयोधर एकः । चतुर्मात्राख्यो मधुभारमेतत् ॥ शीर्षे अर्द्धांते ॥ ७५ ॥ (G).

१७६ । उदाहरति । यस्य चन्द्रः शीर्षे परिधानं दिशः । स शम्भुदेवः तुभ्यं सुखं ददातु ॥ (C).

१७६ । मधुभारमुदाहरति । जस्विति । यस्य शीर्षे चंद्रः पिंधनं दिक् । स देवः शम्भुः मह्यं सुखं ददातु ॥ (E).

१७६ । यथा जसु इति ॥ यस्य चंद्रः शीर्षे वस्त्रं दिशः । स शंभुरयं युष्माकं शुभं ददातु ॥ ७६ ॥ इति मधुभारम् ॥ (G).

---

१७६ । १ चंदु (A). २ पीन्धस (B), पिन्धण (C), पिंधण (F). ३ देउ (B & C). ४ तुह्मु (A), तुम्ह (D), मज्झ (E). ५ सुक्खु (A & E), सुब्भ (B & C), सुभ (F). ६ ६० (A), ७६ (F). ७ मधुहार (B), मङ्गहार (C).

१७७ । १ एगारह (B), इग्गारह (C). २ एह (F). ३ सुच्छन्द (C), सुछंदु (E). ४ अहीर (B & C), अहिर (E). ५ जप्पइ (B), जम्पइ (C). ६ वीर (A & D), धीर (B), वीर (C). ७ ६८ (A), ७७ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, सुंदरि गुज्जरि[1] णारि[2] लोअण दीह बिसारि[3] ।
पीण पओहर भार लोलइ[4] मोत्तिअ[5] हार ॥
१७८[6] ॥ अहीर । (A).

---

१७७ । अथाधीरच्छन्दः ॥ एकादशमात्राः क्रियन्ते अन्ते पयोधरो दीयते । एतच्छन्दः अधीरं जल्पति पिंगलधीरः ॥ पयोधरो जगणः, स चैकादशमात्रान्तःपाती, प्राथमिकमात्रासप्तकन्तु यथेच्छं, न तु सूत्रोदाहरणाद्भवति । आभीरनामकं छंद इति केचित् । (C).

१७७ । अथाभीरनामकं वृत्तं लक्षयति गारहेति । यत्र गारह मत्त—एकादशमात्राः क्रियंते, पयोधरः दीयते, कर्त्तव्यास्वेकादशमात्रासु अंतिममात्राचतुष्टयं जगणस्वरूपमेव स्थाप्यते इत्यर्थः, [एक]—एतत् आभीर सुछंदु—आभीरः सुच्छंदः इति पिंगलधीरः जल्पति ॥ (E).

१७७ । गारेति । एकादशमात्राः क्रियंते अंते पयोधरो दीयते । एतत् सुच्छंदः अभीरं जल्पति पिंगलो धीरः ॥ एकादशमात्रामध्ये अंते मात्राचतुष्टयं जगणरूपं कार्यमित्यर्थः ॥ ७७ ॥ (G).

१७८ । उदाहरति । सुन्दरी गुज्जरी नारी, लोचनं दीर्घविशारि । पीनपयोधरभारे लोलते मौक्तिकहारः ॥ (C).

१७८ । आभीरमुदाहरति । यस्याः पीनपयोधरभारे मौक्तिकः

---

१७८ । १ गुज्जर (F). २ Dropt in (F). ३ विद्यारि (B). ४ लूलइ (A), लोटइ (E), लोलिअ (F). ५ मोतिम (B & C), मोतिअ (D). ६ ६९ (A), ७८ (F).

CC-0. In Public Domain. Funding by IKS-MoE

अथ दण्डकलच्छंदः । (D).

कुंत[1] अरु[2] धणुद्धरु[3] हअबर[4] गअबरु
छक्कलु[5] बिबि[6] पाइक्क दले
बत्तीसह[7] मत्तह[8] पअ[9] सुपसिद्धउ[10]
जाणह[11] बुहअण हिअअतले[12] ।
सउबीस अठग्गल[13] कल संपुसउ
रूअउ[14] फणि[15] भासिअ भुअणे
दंडअल णिरुत्तउ गुरु संजुत्तउ[16]
पिंगलिअं[17] जंपंत[18] मणे ॥ १७९[19] ॥

---

हारः लोटइ—लुठति, दीर्घविशाललोचना सा सुंदरी गुर्ज[री] नारी ॥ (E).

१७८। सुंदेति॥ सुंदरी गुर्जरी नारी लोचने दीर्घे विशाले। पीनः पयोधरभारो लोलते मौक्तिकहारः॥ ७८॥

इत्यधी[भी]रम् ॥ (G).

---

१७९। १ ता कुंत (A), कणु (B). २ Dropt in (A), हरु (B & C), डरु (E). ३ धणुद्धर (A & C). ४ हअअरु (A). ५ कप्पउ (A, B, C & D). ६ वेवि (B & C). ७ वत्तीस (A, B, E & F). ८ मत्त (A & B), मत्तउ (F). ९ पअ पअ (A & B). १० सुपसिद्धह (D). ११ जाणऊ (B & C). १२ हिअअरए (A & C), हिअअहरे (B), हिअअअले (F). १३ पअग्गल (A, B & C), विहट्टग्गल (D), अट्ठग्गल (F). १४ रूअरु (A & E), अरउ (D), वुत्तउ (F). १५ भणि (B). १६ संजुत्तअ (F). १७ पिंगलआ (A), पिंगलअं (D), पिंगलीआ (E), पिंगल (F). १८ जप्पत (B), पद्दअ (F). १९ ७० (A), ७९ (F).

Digitized by eGangotri and Sarayu Trust.



१७९ । अथ दण्डकलच्छन्दः । कुन्तधरो धनुर्द्धरो हयवरः गजवरः षट्पदोऽपि द्वौ दले, द्वात्रिंशन्मात्रिकं पदं सुप्रसिद्धं जानीहि बुधजनहृदयहरं । शतविंशतिकपदाधिककलासंपूर्णं रूपकं फणिभाषितं भुवने दण्डकलं निरुक्तं गुरुसंयुक्तं पैङ्गलिका जपत मनसा ॥ कुन्तधरादयश्चत्वारश्चतुष्कलवाचकाः, तेनादौ चतुष्कलगणाः, षट्पदः षट्कलगणः, दले चरणे, पदम् अष्टकलं द्वात्रिंशन्मात्रोऽत्र पादस्तस्य चतुर्थांशः पदं तेनाष्टौ मात्रा लभ्यन्ते, तेनाष्टाविंशत्यधिकशतकलासम्पूर्णमित्यर्थः । अन्ते गुरुसंयुक्तं, पैङ्गलिकाः पिङ्गलाध्ययनवन्तः । (C).

१७९ । अथ दंडकलं लक्षयति कुंतद्धरु इति । कुंतधरः धनुर्द्धरः हयवरः गजवरः एतच्चतुष्कलचतुष्टयं, ततः छक्कलु— षट्कलः, ततश्च गुरुसंजुत्तउ—गुरुसंयुक्तम् अंतस्थितैकगुरुकमित्यर्थः, विवि पाइक्क—पदातिद्वयं चतुष्कलद्वयमित्यर्थः, एवं दले—पूर्वार्द्धे उत्तरार्द्धे चेत्यर्थः, बत्तीस मत्तह—द्वात्रिंशन्मात्राः पत्र—पादे पतंति प्रत्येकमिति शेषः, संपुस[उ]—चरणचतुष्टयस्या इत्यर्थः, बीस अठग्गलु[ल]—अष्टाविंशत्यधिकाः सउकल—शतं कला भवंति, तत् सुपसिद्धउ—सुप्रसिद्धं फणि भासिअ रूअउ—फणिभाषितरूपं, भुअणे—भुवने दंडकल णिरुत्तउ—दंडकलः निरुक्तः इति पैंगलिका मनसि जल्पंति हे बुधजनाः यूयं हिअअतले—हृदयतले जाणऊ[ह]—जानीत॥ यत्र प्रथमं चतुष्कलचतुष्टयं तत एकः षट्कलः ततश्च पुनश्चतुष्कलद्वयं तत एको गुरुः प्रतिचरणं पतति, तद्दंडकलनामकं वृत्तमिति फलितार्थः । (E).

CC-0. In Public Domain. Funding by IKS-MoE

Nyayabinduṭika, (Text) ... ... ... ... Rs. 0 10

Digitized by eGangotri and Sarayu Trust

Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each ... ... ... ... ... 3 6

Padumawati Fasc. 1–3 @ 2/ ... ... ... ... 6 0

Pariçiṣta Parvan, (Text) Fasc. 1–5 @ /6/ each ... ... ... 1 14

Prākrita-Paingalam, Fasc. 1–2 @ /6/ each ... ... ... 0 12

Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each ... ... 1 14

Ditto (English) Part II, Fasc. 1 ... ... ... 0 12

Prākrta Lakṣaṇam, (Text) Fasc. 1 ... ... ... ... 1 8

Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each ... ... ... ... 7 8

Parāçara, Institutes of (English) ... ... ... ... 0 12

Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each ... ... 2 4

*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc. ... ... 12 6

Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each ... ... 1 8

Ditto (English) Fasc. 1–3 @ /12/ each ... ... 2 4

Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/ ... ... ... 0 12

*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each ... ... 12 0

Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each ... ... 7 2

Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–10 @ /6/ each ... ... ... ... 13 14

Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1–2 @ /6/ ... ... ... 0 12

Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each ... ... ... 1 14

Upamita-bhava-prapañca-kathā (Text) Fasc. 1–3 @ /6/ each ... 1 2

Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/ ... ... 4 8

Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each ... ... ... 5 4

*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each ... ... ... ... ... 4 8

Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each ... ... ... 0 12

Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each ... ... ... 2 10

Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/ ... ... 2 4

Vṛhat Svayambhū Purāṇa, Fasc. 1–6 ... ... ... 2 4

### *Tibetan Series.*

Pag-Sam Ṭhi S'iñ, Fasc. 1–4 @ 1/ each ... ... ... 4 0

Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each ... ... ... ... ... ... 13 0

Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each ... ... ... ... ... 10 0

### *Arabic and Persian Series.*

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ... 4 14

Al-Muqaddasi (English) Vol. I, Fasc. 1–2 @ /12/ ... ... 1 8

Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each ... ... ... 22 0

Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each ... ... ... ... 29 12

Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each ... ... 37 0

Ditto English Fasc, 1–5 @ 1/ each ... ... ... 5 0

Arabic Bibliography, by Dr. A. Sprenger ... ... ... 0 6

Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each ... ... 7 2

Catalogue of Arabic Books and Manuscripts ... ... ... 1 0

Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each ... ... 3 0

Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each ... ... ... ... ... 21 0

Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each ... ... 14 0

Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each ... ... ... ... ... 3 0

Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each ... ... 3 6

Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each ... ... 1 8

Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ... 0 12

History of the Caliphs, (English) Fasc. 1–6 @ /12/ each ... ... 4 8

Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each ... ... 1 2

Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each ... ... 38 4

Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each ... ... 13 2

Maghāzi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each ... ... 1 14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

| | Rs. | As. |
|---|---|---|
| Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ... | Rs. 5 | 10 |
| Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ... | 12 | 0 |
| Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ... | 7 | 2 |
| Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ... | 2 | 4 |
| Nukhbatu-l-Fikr, (Text) Fasc. 1 ... | 0 | 6 |
| Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each ... | 1 | 8 |
| Riyāẓu-s-Salāṭīn, (Text) Fasc. 1–5 @ /6/ each ... | 1 | 14 |
| *Suyūty's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each ... | 4 | 0 |
| Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each ... | 1 | 14 |
| Ditto (English) Fasc. 1–14 @ /12/ each ... | 10 | 8 |
| Ditto Index ... | 1 | 0 |
| Tārīkh-i-Fīrūz Shāhī of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each ... | 2 | 10 |
| Tārīkh-i-Fīrūzshāhī, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each ... | 2 | 4 |
| Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ... | 3 | 0 |
| Wis o Rāmin, (Text) Fasc. 1–5 @ /6/ each ... | 1 | 14 |
| Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ... | 6 | 6 |
| Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 ... | 0 | 12 |

---

## ASIATIC SOCIETY'S PUBLICATIONS.

| | Rs. | As. |
|---|---|---|
| 1. Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each ... | 50 | 0 |
| 2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No. | | |
| 3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members | | |
| *N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.* | | |
| 4. Centenary Review of the Researches of the Society from 1784–1883 ... | 3 | 0 |
| A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ... | 4 | 0 |
| Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) ... | 2 | 0 |
| Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) ... | 4 | 0 |
| Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882) ... | 4 | 0 |
| 5. Anis-ul-Musharrahin ... | 3 | 0 |
| 6. Catalogue of Fossil Vertebrata ... | 3 | 0 |
| 7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion | 3 | 8 |
| 8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each... | 32 | 0 |
| 9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I | 2 | 0 |
| 10. Khizānatu-l-'ilm ... | 4 | 0 |
| 11. Mahābhārata, Vols. III and IV, @ 20/ each ... | 40 | 0 |
| 12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each | 18 | 0 |
| 13. Sharaya-ool-Islám ... | 4 | 0 |
| 14. Tibetan Dictionary, by Csoma de Körös ... | 10 | 0 |
| 15. Ditto Grammar ... | 8 | 0 |
| 16. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ... | 3 | 0 |
| 17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson... | 1 | 0 |
| 18. Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899 ... | 4 | 0 |

---

| | Rs. | As. |
|---|---|---|
| Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each ... | 29 | 0 |
| Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... | 5 | 0 |

*N.B.*—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

24–10–1900.

Books are supplied by V.P.P.

CC-0. In Public Domain. Funding by IKS-MoE

6340
Digitized by eGangotri and Sarayu Trust.
Price -/12/-.

# BIBLIOTHECA INDICA:

A

## COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 979.

PRATAP SINGH ... SRINAGAR
6007




## प्राकृतपैङ्गलम् ।

# "PRĀKṚITA-PAINGALAM"

EDITED BY

CHANDRA MOHANA GHOSHA, M B., B.A.

AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM OF SANSKRIT PROSODY.

FASCICULUS IV.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

CC-0. In Public Domain. Funding by IKS-MoE